दुस्वप्ननाशिनी धन्यां प्रपद्येऽहं शर्मीं शुभाम्।।

ॐ अग्निम्मूर्द्धा दिव ऽककुत्पतिः
पृथिव्याऽअयम्।। अपाᳪरेताᳪसि
जिन्वति।। ३/१२

ॐ सगण सदाशिवाय सपरिवाराय नमः। शमीपत्रान् समर्पयामि।

तुलसीपत्र

तुलसीपत्र पावित्रानि हरिप्रीति कराणि च।
भक्त्या समर्पयेतुभ्यं मोक्षज्ञान प्रदोभव।।

ॐ इदंव्विष्णुर्व्विचक्रमेत्रेधानिदधेपदम्।
समूढमस्यपाᳪसुरेस्वाहा।। ५/१५

ॐ सगण सदाशिवाय सपरिवाराय नमः। तुलसीपत्राणि समर्पयामि।

बिल्वपत्र

त्रिदलं त्रिगुणकारं त्रिनेत्रं च त्रिधायुधं।
त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम्।।१।।

काशीवासनिवासी च कालभैरव पूजनम्।
प्रयागे माघमासे च बिल्वपत्रं शिवार्पणम्।।२।।

दर्शनं बिल्वपत्रस्य स्पर्शनं पापनाशनम्।
अघोर पापसंहारं बिल्वपत्रं शिवार्पणम्।।३।।

अखण्डैः बिल्वपत्रैश्च पूजयेच्छिवशंकरं।
कोटिकन्या महादानं बिल्वपत्रं शिवार्पणम्।।४।।

ग्रहाण बिल्वपत्राणि सपुष्पानि महेश्वर।
सुगन्धीनि भवानीय शिवस्त्वं कुसुमप्रिय।।५।।

त्रिशाखैः बिल्वपत्रैश्च अछिद्रैः कोमलैः शुभैः।
तव पूजां करिष्यामि ग्रहाण परमेश्वर।।६।।

श्रीवृक्षामृतसम्भूतं शंकरस्य सदाप्रियं।
पवित्रं ते प्रयच्छामि बिल्वपत्रं सुरेश्वर।।७।।

त्रिशाखैः बिल्वपत्रैश्च कोमलैः चातिसुन्दरैः।
त्वां पूजयामि विश्वेश प्रसन्नो भव सर्वदा।।८।।

अमृतोद्भव श्रीवृक्षं शंकरस्य सदाप्रियं।
तत्ते शंभो प्रयच्छामि बिल्वपत्रं सुरेश्वर।।९।।

ॐ नमोबिल्मिनेचकवचिनेचनमो
व्वर्म्मिणेचव्वरूथिनेचनमः श्श्रुतायचश्श्रुत
सेनायचनमोदुन्दुब्भ्यायचाहनन्यायच।। १६/३५

ॐ नमःपर्ण्णायचपर्ण्णशदायचनमऽ
उद्गुरमाणायचाभिघ्नतेचनमऽआखिदते
चप्प्रखिदतेचनमऽइषुकृद्भ्योधनुष्कृद्भ्य
श्श्चवोनमोनमोवः किरिकेभ्योदेवाना
हृदयेब्भ्योनमोव्विचिन्वत्केब्भ्योनमोव्वि
क्षिणत्केब्भ्योनमऽआनिर्हतेब्भ्यः।। १६/४६

ॐ सगण सदाशिवाय सपरिवाराय। बिल्वपत्राणि समर्पयामि।।

अर्क-धत्तूर-आदि

अर्कधत्तूरपुष्पाणि सफलानि महेश्वर।
भक्त्या तुभ्यं प्रदास्यामि भोगमोक्ष प्रदोभव।।

ॐ उदुत्यञ्जातवेदसन्देवंव्वहन्तिकेत
वः दृशेव्विश्श्वायसूर्य्यम्।।७/४१

ॐ सगण सदाशिवाय सपरिवाराय नमः। अर्कपुष्पाणि समर्पयामि।।

ॐ धामन्तेव्विश्श्वम्भुवनमधिश्रि
तमन्तः समुद्रेत्दृद्यन्तरायुषि।। अपामनी
केसमिथेयऽआभृतस्तमश्यामममधुमन्तन्तऽ
ऊर्म्मिम्।।१७/६६

ॐ सगण सदाशिवाय सपरिवाराय नमः। धत्तूर फलानि समर्पयामि।।

कमल

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदकोने तस्मिन्निजमुदहरन्नेत्रकमलम्।
गगतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम्।।

ॐ काशी विश्वनाथाय नमः। पद्म पुष्पाणि समर्पयामि।।

विजया

विजया विजयदात्री चेतानन्द प्रदायिनी।
आशुतोष महादेव सर्वत्र विजयं कुरु।।

ॐ विज्ज्यन्धनुः कपर्द्दिनोविशल्ल्यो बाणवाँ२उत। अनेशन्नस्ययाऽइषवऽआ भुरस्यनिषङ्गधिः।। १६/१०

ॐ सगण सदा शिवाय नमः। विजयापानं समर्पयामि।।

धूप

वनस्पतिरसोद्भूतं गन्धाढ्यं गन्धमुत्तमम्।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।।

ॐ नमः कपर्द्दिने चव्व्युप्तकेशायच नमः सहस्राक्षायचशतधन्न्वनेचनमो गिरिशयायचशिपिविष्टायचनमोमीढुष्ट्टमायचेषुमतेच।। १६/२९

ॐ सगण सदाशिवाय सपरिवाराय नमः। प्रत्यक्षं धूपमाघ्रापयामि।।

दीपक

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं ग्रहाण देवेश त्र्योलेक्य तिमिरापहम्।।

ॐ नमऽआशवे चाजिरायचनमः शीग्घ्यायचशीब्भ्यायचनमऽऊम्म्यायचावस्वन्न्यायचनमो नादेयायचद्वीप्प्यायच।। १६/३१

ॐ सगण सदाशिवाय सपरिवाराय नमः। प्रत्यक्षदीपं दर्शयामि।। हस्तप्रक्षालनं।।

नैवेद्य

शर्कराघृतसंयुक्तं मधुरं सुस्वादुचोत्तमम्।
उपाहार समायुक्तं नैवेद्यं प्रतिगृह्यताम्।।

ॐ नमोज्ज्येष्ठाय चकनिष्ठायचनमः पूर्व्वजायचापरजायचनमोमद्ध्यमायचापगल्भायचनमोजघन्न्यायचबुध्न्यायच।। १६/३२

ॐ प्राणाय स्वाहाः। ॐ अपानाय स्वाहा। ॐ व्यानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ समानाय स्वाहा।

ॐ स्वादिष्ठयामदिष्ठयापवस्वसोम धारया।। इन्द्रायपातवेसुतः।। २६/२५

ॐ सगण सदाशिवाय सपरिवाराय नमः। नैवेद्यं सुभोजयामि।।

आचमन

अतितृप्तिकरं तोयं सुगन्धं च पिबेच्छया।।
त्वयि तृप्ते जगत्तृप्तं नित्यं तृप्ते महात्मनि।।

ॐ नमः सोब्भ्याय चप्प्रतिसर्य्यायच नमोयाम्म्यायचक्षेम्म्यायचनमः श्लोक्क्याय चावसान्न्यायचनमऽउर्व्वर्य्यायचखल्ल्यायच।। १६/३३

ॐ सगण सदाशिवाय सपरिवाराय नमः। आचमनीयजलं समर्पयामि।।

ऋतुफल

फलेन फलितं सर्वं त्र्यैलोक्यं स चराचरं।
तस्मात्फल प्रदानेन सफला सन्तु मनोरथाः।।

ॐ इमारुद्द्राय तवसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमती। यथाशमसद्विपदेचतुष्पदेविश्श्वम्पुष्टङ्ग्रामेऽअस्म्मिन्ननातुरम्।
१६/४८

ॐ सगण सदाशिवाय सपरिवाराय नमः। कालोद्भवानि फलानि समर्पयामि।।

सफल ताम्बूल

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।
खदिरेण समायुक्तं ताम्बूलं प्रतिगृह्यताम्।।

ॐ पातन्नोऽअश्श्विनादिवापाहिनक्त्तङ्सरस्वती। दैव्व्याहोताराभिषजापातमिन्द्रङ्सचासुते।। २०/६२

ॐ सगण सदाशिवाय सपरिवाराय नमः। सफलताम्बूलं समर्पयामि।

दक्षिणा-दान

हिरण्यगर्भ गर्भस्थं हेमवीजं विभावसो।
अनन्तपुण्य फलदः अतः शान्तिं प्रयच्छ मे।।

ॐ यद्दत्तंय्यत्परादानंय्यत्पूर्त्तंय्याश्श्च दक्षिणाः। तदग्निर्व्वैश्श्वकर्म्मणः स्वर्द्देवेषु नौदधत्। १८/६४

ॐ सगण सदाशिवाय सपरिवाराय नमः। कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।

हाथ में पुष्पफलादि लेकर स्तुति करें।

मन्दारमाला कुलितालिकायै कपालमालाङ्कित शेखराय।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय।।

नमः सर्वहितार्थाय जगदाधार हेतवे।
साष्टाङ्गः प्रणामो हि प्रयत्नेन मयाकृतः।।
शिवतत्वं न जानामि कीदृशोऽसि महेश्वरः।
यादृशोऽसि महादेव तादृशाय नमो नमः।।

ॐ ओजश्श्च मेसहश्श्चमऽआत्माच मेतनूश्श्चमेशर्म्मचमेव्वर्म्मचमेङ्गानिचमे स्थीनिचमेपरूंषिचमेशरीराणिचमऽआयुश्श्चमेजराचमेयज्ञेनकल्पन्ताम्।। १८/३

।। षड्वक्त्रपूजा ।।

ॐ प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभम्।
भस्माभ्यङ्गमनङ्गदेहदहनं ज्वालवलीलोचनम्।।
ब्रह्मेन्द्राग्नि मरुद्गणैः स्तुतिपरैरभ्यर्चितं योगिभिः।
वन्देऽहं सकलं कलंकरहितं स्थाणोर्मुखम् पश्चिमम्।।
।। ॐ पश्चिमवक्त्राय शिवाय नमः।।

ॐ गौरं कुंकुम पिंगल सुतिलकं व्यापाण्डु गण्डस्थलम्।
भ्रू विक्षेप कटाक्ष वीक्षणलसत्संसक्त कर्णोत्पलम्।।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालं कृतम्।
वन्दे पूर्णशशांकमण्डलनिभं वक्त्रं हरस्योत्तरम्।।
।। ॐ उत्तरवक्त्राय शिवाय नमः।।

ॐ कालभ्रभ्रमराञ्जनाचलनिभं व्यादीप्त पिंगेक्षणम्।।
खण्डेन्दुद्युति मिश्रदोग्रदशनं प्रोद्भिन्न दंष्ट्रांकुरम्।।
सर्पप्रोत कपालशक्ति सुलभं व्याकीर्ण तच्छेखरम्।
वन्दे दक्षिणमीश्वरस्य जटिलं भ्रूभंगरौद्रं मुखं।।

।। ॐ दक्षिणवक्त्राय शिवाय नमः।।

ॐ संवर्त्ताग्नितडित्प्रदीप कनक प्रस्पर्द्धितेजोरुणम्।
गम्भीरस्मित निःसृतोग्रदर्शनं प्रोद्भासिताम्राधरम्।।
बालेन्दुद्युतिलोलपिंङ्गलजटा भारं प्रबद्धोरगम्।
वन्दे सिद्ध सुरासुरेन्द्र नमितं पूर्वं मुखं शूलिनः।।

।। ॐ पूर्ववक्त्राय शिवाय नमः।।

ॐ व्यक्ताव्यक्त गुणोत्तरं सुवदनं षड्विंशतत्वाधिकम्।
वेदाद्यक्षरमन्त्रशास्त्रनिलयं ध्येयं सदायोगिभिः।।
वन्दे तामसवर्जितेन मनसा सूक्ष्मातिसूक्ष्मं परम्।
शान्तं पंचममीश्वरस्यवदनं खव्याप्त तेजोमयमं।

।। ॐ ऊर्ध्ववक्त्राय शिवाय नमः।।

ॐ यद्वेदाद्यमनन्तशास्त्रमगुणं सम्पूजितं चामरैः।
पुण्याङ्गाम्बुज नागपुष्पवकुल नागासुराद्यर्चितम्।।
नित्यं भानुसहस्त्रदीप्तकिरणं कालज्ञतेजोऽमयम्।
तत्कल्याणकरं नमामि सततं पाताल षष्ठं मुखम्।।

।।ॐ पातालवक्त्राय शिवाय नमः।।

अथ द्वादश ज्योतिर्लिंगपूजा

ॐ सौराष्ट्रदेशे विशदेऽतिरम्ये ज्योतिर्मयं चन्द्रकला वतंसम्।
भक्तिप्रदानाय कृपावतीर्णतं सोमनाथं शरणं प्रपद्ये।।1।।
।। श्री सोमनाथाय नमः।।

ॐ श्री शैलशृंगे विबुधातिसंगे तुलाद्रितुंगेऽपि मुदा वसन्तम्।
तमर्जुनं मल्लिकपूर्वमेकं नमामि संसार समुद्रसेतुम्।।2।।
।। श्री मल्लिकार्जुनाय नमः।।

ॐ अवन्तिकायां विहितावतारं भक्तिप्रदानाय च सज्जनानाम्।
अकालमृत्यो परिरक्षणार्थवन्देमहाकाल महासुरेशम्।।3।।
।। श्री महाकालेश्वराय नमः।।

ॐ कावेरिकानमर्दयोः पवित्रे समागमे सज्जन तारणाय।
सदैव मान्धातृपदे वसन्तमोकारमीशं शिवमेकमीडे।।4।।
।। श्री ओंकारेश्वराय नमः।।

ॐ पूर्वोत्तरे प्रज्वलिका निधाने सदा वसन्तं गिरजासमेतम्।
सुरासुराराधित पादपद्मं श्रीवैद्यनाथं शरणं प्रपद्ये।।5।।
।। श्री वैद्यनाथाय नमः।।

ॐ याम्ये सदंगे नगरेऽतिरम्ये विभूषितांग विविधैश्च भोगैः।
सदभक्तिमुक्तिं प्रदमीशमेकं श्रीनागनाथं शरणं प्रपद्ये।।6।।
।। श्री नागनाथाय नमः।।

ॐ महाद्रिपार्श्वे च तटे रमन्तं सम्पूज्यमानं सततं मुनीन्द्रै।
सुरासुरैयक्षमहोरगाद्यै केदारमीशं शिवमेकमीडे।।7।।
।। श्री केदारनाथाय नमः।।

ॐ सह्याद्रिशीर्षे विमलेवसन्तं गोदावरीतीरं पवित्र देशे।
यद्दर्शनात्पातकमाशु नाशं प्रयाति तं त्र्यम्बकमीशमीडे।।8।।
।। श्री त्र्यम्बकेश्वराय नमः।।

ॐ सुताम्रपर्णी जलराशियोगे निवद्धसेतुं विशिखैरसंख्यैः।
श्रीरामचन्द्रेण समर्पितं तं रामेश्वराख्यं नियतं नमामि।।9।।
।। सेतुबन्ध श्री रामेश्वराय नमः।।

ॐ यं डाकिनी शाकिनिका समाजे निषेव्यमाणं पिशिताशनैश्च।
सदैव भीमादिपद प्रसिद्धं तं शंकरं भक्तहितं नमामि।।10।।
।। श्री भीमशंकराय नमः।।
ॐ सानन्दमानन्दवने वसन्तं आनन्दकन्दं हृतपापवृन्दम्।
वाराणसीनाथमनाथनाथं श्रीविश्वनाथं शरणं प्रपद्ये।।11।।
।। श्री काशीविश्वनाथाय नमः।।
ॐ इलापुरे रम्यविशालकेऽस्मिन् समुल्लसन्तं च जगद्वरेण्यं।
वन्दे महोदारतर स्वभावं घृष्णेश्वराख्यं शिवमेकमीडे।।12।।
।। श्री घृष्णेश्वराय नमः।।
ॐ ज्योतिर्मयं द्वादश लिङ्गकां शिवात्मनां प्रोक्तमिदं क्रमेण।
स्तोत्रं पठित्वा मनुजोति भक्त्या फलं तदालोक्य निजंभवेच्च।।
।। श्री द्वादशज्योतिर्लिंग देवताभ्यो नमः।।

शिवपंचाक्षर स्तोत्र

ॐ नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय।
नित्याय शुद्धाय दिगम्बराय तस्मै न काराय नमः शिवाय।।१।।
ॐ मन्दाकिनीसलिलचन्दनचर्चिताय नन्दीश्वरप्रमथनाथमहेश्वराय।
मन्दारपुष्पबहुपुष्पसुपूजिताय तस्मै म काराय नमः शिवाय।।२।।
ॐ शिवाय गौरीवदनाब्जवृन्द सूर्याय दक्षाध्वरनाशकाय।
श्री नीलकण्ठाय वृषध्वजाय तस्मै शि काराय नमः शिवाय।।३।।
ॐ वसिष्ठकुम्भोद्भवगौतमार्य मुनीन्द्र देवार्चित शेखराय।
चन्द्रार्कवैश्वानर लोचनाय तस्मै व काराय नमः शिवाय।।४।।
ॐ यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय।
दिव्याय देवाय दिगम्बराय तस्मै य काराय नमः शिवाय।।५।।
पंचाक्षरमिदं स्तोत्रं यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते।।६।।

श्री रुद्राष्टकम्

नमामीशमीशान निर्वाणरूपं। विभुं व्यापकं ब्रह्मवेद स्वरूपं।।
निजं निर्गुणं निर्विकल्पं निरीहं। चिदाकाशमाकाशवासं भजेऽहं।।१।।
निराकारमोङ्कारमूलं तुरीयं। गिरा ग्यान गोतीतमीशं गिरीशं।।
करालं महाकालकालं कृपालं। गुणाकार संसारवारं नतोऽहं।।२।।
तुषाराद्रि संकाशगौरं गभीरं। मनोभूत कोटि प्रभा श्री शरीरं।।
स्फुरन्मौलि कल्लोलिनी चारुगंगा। लसद्भाल बालेन्दु कंठे भुजंगा।।३।।
चलत्कुण्डलं भ्रू सुनेत्रं विशालं। प्रसन्नाननं नीलकण्ठं दयालं।।
मृगाधीश चर्माम्बरं मुण्डमालं। प्रियं शंकरं सर्वनाथं भजामि।।४।।
प्रचण्डं प्रकृष्टं प्रगल्भं परेशं। अखण्डं अजं भानुकोटि प्रकाशं।।
त्रयः शूल निर्मूलनं शूलपाणि। भजेऽहं भवानीपतिं भावगम्यं।।५।।
कलातीत कल्याण कल्पान्तकारी। सदासज्जनानन्द दाता पुरारी।।
चिदानन्द संदोह मोहापहारी। प्रसीद प्रसीद प्रभो मन्मथारी।।६।।
न यावद् उमानाथ पादारविन्दं। भजंतीह लोके परे वा नराणाम्।।
न तावत्सुखं शान्ति संतापनाशं। प्रसीद प्रभो सर्वभूताधिवासं।।७।।
न जानामि योगं जपं नैवपूजां। नतोऽहं सदा सर्वदा शंभु तुभ्यं।।
जराजन्मदुःखौघ तातप्यमानं। प्रभोपाहि आपन्नमामीश शंभो।।८।।
रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतोषये।।
ये पठन्ति नरा भक्त्या तेषां शंभुः प्रसीदति।।९।।

ॐ नमः शिवाय

इसके बाद तिलक आशीर्वाद आदि करें। ब्राह्मणों को दक्षिणा दें। इसके बाद विसर्जन तथा अभिषेक करें।

।। सदा शिवार्पणमस्तु।।

इसके बाद भगवान शंकर की मूर्ति पर सछिद्रकलश तिपाई पर रखें या रस्सी के सहारे लटका दें तथा उसमें दूध-दही-घी शक्कर-शहद आदि जल में मिलाकर एक या एकाधिक पदार्थों से अविछिन्न धारा चलावें। कामनाभेद से अन्य वस्तुओं से भी अभिषेक कर सकते हैं। जैसे गन्धोदक-इक्षुरस इत्यादि।

इसके बाद रुद्राभिषेक (रुद्राष्टाध्यायी का पूरा पाठ) शतरुद्री से (केवल १०० मंत्रों से) अथवा नमकचमकात्मक सम्पूर्ण रुद्राभिषेक अपनी श्रद्धा के अनुसार कर सकते हैं। यह अनेक प्रकार से होता है। इसके बाद यथा संख्य ब्राह्मणों का वरण कर उन्हें तिलक कर वस्त्र दक्षिणा आदि दें।

-: यजमान द्वारा रक्षा बन्धन :-

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाऽऽप्नोति दक्षिणाम्।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते।।

-: यजमान द्वारा तिलक :-

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दा नामे नमः।।

-: आचार्य द्वारा रक्षा बन्धन :-

ॐ यदा बध्नन् दाक्षायणा हिरण्य७ँशतानीकाय सुमनस्यमानाः।
तन्म आ बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम्।।
ये बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वामनुबध्नामि रक्षे मा चल मा चल।।

-: आचार्य द्वारा तिलक :-

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।

षडंग न्यासः :- मनोजूतिरिति मन्त्रस्य बृहस्पति-र्ऋषिः बृहतीछन्दः बृहस्पतिर्देवता हृदयन्यासे जपे पाठे विनियोगः।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य-बृहस्पतिर्य्यज्ञमिमन्तनो त्वरिष्टंय्यज्ञ ६ समिमन्दधातुव्विश्श्वेदेवास ऽइहमादयन्ता मो३म्प्रतिष्ठ ।। ॐ हृदयायनमः। २/१३

अबोद्ध्यग्निरितिमंत्रस्य बुधगविष्ठिराऋषिः अग्निर्देवता त्रिष्टुप्छन्दः शिरोन्यासे जपे विनियोगः।

ॐ अबोद्ध्यग्नि ? समिधाजनानाम्प्रति धेनुमिवायतीमुषासम्। यह्वा ऽइवप्प्रवया मुज्जिहानाः प्रभानवः सिस्त्रतेनाकमच्छ।। ॐ शिरसे स्वाहा। १५/२४

मूर्द्धानमितिमंत्रस्य भरद्वाजऋषिः अग्निर्देवता त्रिष्टुप्छन्दः शिखान्यासे जपे विनियोगः।।

ॐ मूर्द्धानन्दिवो ऽअरतिम्पृथिव्या-व्वैश्श्वानरमृत ऽआजातमग्निम्। कवि ६ सम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनय न्तदेवाः। ॐ शिखायै वषट्।। ३३/८

मर्म्माणितइतिमंत्रस्य अप्रतिरथऋषिः मर्म्माणि देवता विराट्छंदः कवचन्यासे जपे विनियोगः।।

ॐ मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम्। उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु।।

ॐ कवचायहुम्।। १७/३३

विश्वतश्चक्षुरितिमंत्रस्य विश्वकर्माभौवनऋषिः विश्वकर्मादेवता त्रिष्टुप्छन्दः नेत्रन्यासे जपे विनियोगः।।

ॐ व्विश्श्वतश्चक्षुरुतव्विश्श्वतोमुखोव्विश्वतोबाहुरुतव्विश्श्वतस्पात्। सम्बाहुब्भ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः।।

ॐ नेत्रत्रयायवौषट्।। १७/१९

मानस्तोकइतिमन्त्रस्य परमेष्ठीऋषिः एकरुद्रो देवता जगतीछन्दः अस्त्रन्यासे जपे विनियोगः।

ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः।। मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्त्वाहवामहे। ॐ अस्त्रायफट्। १६/१६

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं,
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।।

अथ प्रथमोऽध्याय

श्री गणेशाय नमः।। हरिः ॐ।।

गणानान्त्वागणपतिꣳ हवामहेप्प्रियाणान्त्वा प्प्रियपतिꣳ हवामहेनिधीनान्त्वानिधिपतिꣳ हवामहेव्वसोमम।। आहमजानि गब्भधमात्त्वमजासिगब्भधम्।।१।। २३/१९

गायत्रीत्रिष्टुप्जगत्यनुष्टुप्पङ्क्त्यासह।। बृहत्युष्णिहाककुप्सूचीभिः शम्म्यन्तुत्त्वा।।२।। २३/३३ द्विपदायाश्च्चतुष्प्पदास्त्रिपदायाश्च षट्पदाꣳ।। व्विच्छन्दायाश्च्चसच्छन्दाꣳ सूचीभिः शम्म्यन्तुत्त्वा।।३।। २३/३४ सहस्तोमाꣳ सहच्छन्दसऽआवृतः सहप्प्रमाऽऋषयꣳ सप्प्तदैव्व्याꣳ। पूर्व्वेषाम्पन्थामनुदृश्यधीराऽ

अन्वालेभिरेरत्थ्योनरश्म्मीन् ।।४।।२३/४६ ॐ
यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवै
ति। दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्त
न्न्मेमनः शिवसङ्कल्प्पमस्तु ।।५।। येन
कर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिव्विद
थेषुधीराः ।। यदपूर्व्वंय्यक्षमन्तः प्रजा
नान्तन्मेमनः शिवसङ्कल्प्पमस्तु ।।६।।
यत्त्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्तर
मृतम्प्रजासु ।। यस्म्मान्नऽऋतेकिञ्चनकर्म्म
क्रियतेतन्न्मेमनः शिवसङ्कल्प्पमस्तु ।।७।।
येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन
सर्व्वम् ।। येन यज्ञस्त्रायतेसप्तहोतातन्न्मे
मनः शिवसङ्कल्प्पमस्तु ।।८।। यस्म्मिन्नृ
चः सामयजूᳬषियस्म्मिन्न्प्रतिष्ठितारथना
भाविवाराः ।। यस्म्मिँश्चित्तᳬ सर्व्वमोतम्प्रजा
नान्तन्मेमनः शिवसङ्कल्प्पमस्तु ।।९।।

सुषारथिरश्श्वानिवयन्न्मनुष्ष्यान्नेनीयतेभी
शुभिर्वाजिनऽइव ।। हृत्प्रतिष्ठन्न्यदजिरञ्ज
विष्ठन्तन्न्मेमनः शिवसङ्कल्प्पमस्तु ।।१०।।
शु.य.अध्याय-३४
इति रुद्रे प्रथमोऽध्यायः ।।१।। (१ से ६ तक)

अथ द्वितीयोऽध्यायः

हरिः ॐ ।। सहस्स्रशीर्षापुरूषः सहस्स्राक्षः
सहस्स्रपात् ।। सभूमि ँ सर्व्वतस्पृत्त्वात्यति
ष्ठद्दशाङ्गुलम् ।।१।। पुरूषएवेद ँ सर्व्वय्य
द्भूतंय्यच्चभाव्व्यम् ।। उतामृतत्त्वस्स्येशानोयदन्नै
नातिरोहति ।।२।। एतावानस्स्यमहिमातो
ज्जयायाँश्श्चपूरुषः ।। पादोस्स्यव्विश्श्वा
भूतानित्रिपादस्स्यामृतन्दिवि ।।३।। त्रिपादूर्द्ध्वऽ
उदैत्पुरुषः पादोस्स्येहाभवत्पुनः ।। ततो
व्विष्ष्वङ्व्व्यक्रामत्साशनानशनेऽअभि
।।४।। ततोव्विराडजायतव्विराजोऽअधि
पूरुषः ।। सजातोऽअत्त्यरिच्च्यतपश्श्चा

द्भूमिमथोपुर ः ।।५।। तस्माद्यज्ञात्सर्व्वहुत ः
सम्भृतम्पृषदाज्ज्यम् ।। पशूँस्ताँश्चक्रेव्वाय
व्यानारण्ण्याग्राम्म्याश्च्चये ।।६।। तस्माद्य
ज्ञात्सर्व्व हुत ऽऋच ः सामानिजज्ञिरे ।।
छन्दा ँ सिजज्ञिरे तस्मा द्यजुस्तस्म्माद
जायत ।।७।। तस्मादश्श्वा ऽअजायन्त
येकेचोभयादत ः ।। गावोहजज्ञिरेतस्म्मात्त
स्म्माज्जाता ऽअजावय ः ।।८।। तंय्यज्ञम्ब
र्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रत ः।। तेनदेवा ऽ
अयजन्तसाद्ध्या ऽऋषयश्श्चये ।।९।।
यत्पुरुषंव्व्यदधु ः कतिधाव्व्यकल्प्पयन् ।।
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादा ऽ
उच्च्येते ।।१०।। ब्ब्राह्मणोस्यमुखमासी
द्बाहूराजन्न्य ः कृत ः ।। ऊरूतदस्ययद्वैश्य ः
पद्भ्या ँ शूद्रो ऽअजायत ।।११।। चन्द्रमा

मनसोजातश्श्चक्षोः सूर्य्योअजायत ।।
श्श्रोत्राद्वायुश्श्चप्राणश्चमुखादग्निरजायत
।।१२।। नाब्भ्याऽआसीदन्तरिक्ष ꣳशीर्ष्णो
द्यौः समवर्त्तत ।। पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्त
थालोकाँर ऽअकल्प्पयन् ।।१३।। यत्पुरूषेण
हविषादेवायज्ञमतन्वत ।। व्वसन्तोऽस्यासी
दाज्ज्यङ्ग्रीष्म्मइध्मः शरद्धविः ।।१४।।
सप्प्तास्यासन्न्परिधयस्त्रिः सप्प्तसमिधः
कृताः ।। देवायद्यज्ञन्तन्न्वाना ऽअबध्नन
न्न्पुरूषम्पशुम् ।।१५।। यज्ञेनयज्ञमयजन्त
देवास्तानिधर्म्माणिप्प्रथमान्न्यासन् ।। तेहना
कम्महिमानःसचन्तयत्रपूर्व्वेसाद्ध्याःसन्ति
देवाः ।।१६।। अद्भ्यः सम्भृतः पृथिव्यै
रसाच्चविश्श्वकर्म्मणः समवर्त्तताग्ग्रे। तस्य
त्त्वष्टाविदधद्रूपमेतितन्न्मर्त्यस्यदेवत्वमा

जानमग्ग्रे।।१७।। व्वेदाहमेतम्पुरुषम्महान्त
मादित्यवर्णन्तमसः परस्तात्।। तमेवव्वि
दित्वातिमृत्युमेतिनान्न्यऽपन्थाव्विद्यतेयनाय
।।१८।। प्रजापतिश्श्चरतिगर्ब्भेऽअन्तर
जायमानोबहुधाव्विजायते।। तस्ययोनिम्परि
पश्यन्तिधीरास्तस्मिन्न्हतस्त्थुर्ब्भुवनानिव्वि
श्श्वा।।१९।। योदेवेब्भ्यऽआतपतियोदेवा
नाम्पुरोहितः।। पूर्व्वोयोदेवेब्भ्योजातोनमो
रुचायब्ब्राह्मये।।२०।। रुचम्ब्राह्मञ्जनयन्तो
देवाऽअग्ग्रेतदब्ब्रुवन्।। यस्त्वैवम्ब्राह्मणो
व्विद्यात्तस्यदेवाऽअसन्न्वशे।।२१।। श्रीश्श्च
तेलक्ष्मीश्श्चपत्न्यावहोरात्रेपार्श्श्वेनक्षत्राणि
रूपमश्श्विनौव्यात्तम्।। इष्णन्निषाणामुम्मऽ
इषाणसर्व्वलोकम्मऽइषाण।।२२।।

शु.यजुर्वेद अध्याय-३१ (१ से २१ तक)

इति रुद्रे द्वितीयोऽध्यायः।।२।।

हरिः ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।। सङ्क्रन्दनो निमिष एकवीरः शत ँ सेना अजयत्साकमिन्द्रः ।।१।। सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।। तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ।।२।। स इषुहस्तै ँ सनिषङ्गिभिर्व्वशी स ँ स्रष्टा स युध इन्द्रो गणेन ।। स ँ सृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ।।३ ।। बृहस्पते परिदीया रथेन रक्षोहामित्राँ२ अपबाधमान ँ ।। प्रभञ्जन्त्सेना ँ प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ।।४ ।। बलविज्ञाय स्थविर ँ प्रवीर ँ सहस्वान्वाजी सहमान उग्रः । अभिवीरो अभिसत्त्वा सहोजा जैत्र

मिन्द्ररथमातिष्ठगोवित् ।।५।। गोत्रभि
दङ्गोविदंव्वज्ज्रबाहुञ्जयन्तमज्जमप्प्रमृ
णन्तमोजसा ।। इमꣳ सजाताऽअनुवीर
यद्ध्वमिन्द्रꣳ सखायोऽअनुसꣳ रभद्ध्वम्
।।६।। अभिगोत्त्राणिसहसागाहमानो
दयोवीरः शतमन्न्युरिन्द्रः ।। दुश्च्यवनः
पृतनाषाडयुद्ध्योस्माकꣳसेनाऽअवतुप्रयुत्सु
।।७।। इन्द्रऽआसान्नेताबृहस्प्पतिर्द्दक्षिणा
यज्ञः पुरऽएतुसोमः ।। देवसेनानामभि
भञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम्
।।८।। इन्द्रस्यव्वृष्ष्णोव्वरुणस्यराज्ञऽ
आदित्यानाम्मरुताꣳशुर्द्धऽउग्ग्रम् ।। महा
मनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जय
तामुदस्त्थात् ।।९।। उद्धर्षयमघवन्नायु
धान्युत्सत्त्वनाम्मामकानाम्मनाꣳसि ।।
उद्वृत्रहन्वाजिनांव्वाजिनान्न्युद्रथानाञ्ज

यंताख्यन्तुघोषा॑ः ।।१०।। अस्म्माकमिन्द्र॒ः समृ॑तेषुद्ध्वजेष्ष्वस्म्माकंय्या ऽइषवस्ताजय न्तु। अस्म्माकंवीरा ऽउत्तरेभवन्त्वस्म्माँ२ऽ उदेवा ऽअवताहवेषु ।।११।। अमीषाञ्चि त्तम्प्रतिलोभयन्तीगृहाणाङ्गान्न्यप्प्वेपरेहि। अभिप्प्रेहिनिर्द्दहहृत्सुशोकैरन्धेनामित्रास्त मसासचन्ताम् ।।१२।। अवसृष्ट्टापरापत शरव्व्येब्रह्मसंशिते ।। गच्छामित्त्रान्प्रप द्यस्वमामीषाङ्कञ्चनोच्छिष॑ः ।।१३।। प्रेताजयतानर ऽइन्द्रोव॒ःशर्म्मयच्छतु ।। उग्ग्रावः सन्तुबाहवोनाधृष्य्यायथासथ ।।१४।। असौयासेनामरुत॒ःपरेषामब्भ्यै तिन ऽओजसास्पर्द्धमाना ।। ताङ्गूहततम सापव्व्रतेनयथामी ऽअन्न्यो ऽअन्न्यन्नजानन् ।।१५।। यत्रबाणाःसम्पतन्तिकुमाराविवि शिखा ऽइव ।। तन्न ऽइन्द्रोबृहस्प्पतिरदितिः

शर्म्मयच्छतुव्विश्श्वाहाशर्म्मयच्छतु ।।१६ ।।
मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वा
राजामृतेनानुवस्ताम् ।। उरोर्व्वरीयोव्वरूण
स्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ।।१७ ।।

शु.यजुर्वेद अध्याय-१७ (३३ से ४६ तक)

इति रुद्रे तृतीयोऽध्याय ।।३ ।।

अथ चतुर्थोऽध्यायः

हरिः ॐ ।। व्विभ्राड्बृहत्पिबतुसो
म्म्यम्मद्ध्वायुर्द्दधद्यज्ञपतावविर्हुतम् ।। व्वात
जूतोयोऽअभिरक्षतित्त्मनाप्प्रजाः पुपोष
पुरुधाव्विराजति ।।१ ।। उदुत्त्यञ्जातवेद
सन्देवंवहन्तिकेतवः ।। दृशेव्विश्श्वायसूर्य्यम्
।।२ ।। येनापावकचक्षसाभुरण्यन्तञ्जनाँ२ऽ
अनु ।। त्वंव्वरुणपश्यसि ।।३ ।। दैव्व्यावद्ध्
वर्य्यूऽआगतᳬ रथेनसूर्य्यत्वचा ।। मद्ध्वायज्ञ ᳬ
समञ्जाथे ।। तम्प्रत्क्कथायंव्वेनश्चित्रन्दे
वानाम् ।।४ ।। तम्प्रत्क्कथापूर्व्वथाविश्श्वथेम

थाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्व्विदम् ।। प्रतीची
नंवृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुव्व
र्द्धसे ।।५।। अयंव्वेनश्चोदयत्पृश्निग
र्ब्भाज्ज्योतिर्ज्जरायूरजसोव्विमाने ।। इमम
पाꣳसङ्गमेसूर्य्यस्यशिशुन्नविप्प्रामतिभीरि
हन्ति ।।६।। चित्रन्देवानामुदगादनीकञ्च
क्षुर्म्मित्रस्यव्वरुणस्याग्ग्नेः ।। आप्प्राद्यावा
पृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्माजगतस्त
स्थुषश्च ।।७।। आनऽइडाभिर्व्विदथेसुश
स्तिव्विश्श्वानरꣳसवितादेवऽएतु ।। अपि
यथायुवानोमत्सथानोव्विश्वञ्जगदभिपित्त्वे
मनीषा ।।८।। यदद्यकच्चव्वृत्रहन्नुदगाऽअभि
सूर्य्य ।। सर्व्वन्तदिन्द्रतेव्वशे ।।९।। तरणि
र्व्विश्श्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य ।।
व्विश्श्वमाभासिरोचनम् ।।१०।। तत्सूर्य्यस्य
देवत्वन्तन्महित्वम्मद्ध्याकर्त्तोर्व्विततꣳ

सञ्जभार ।। यदेदयुक्तहरितः सधस्त्थादा
द्रात्रीव्वासंस्तनुतेसिमस्मै ।।११।। तन्मित्र
स्यव्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्यौ
रुपस्त्थे ।। अनन्तमन्न्यद्रुशदस्यपाजः कृष्ण
मन्न्यद्धरितꣳ सम्भरन्ति ।।१२।। बण्महाँ२
असिसूर्य्यबडादित्त्यमहाँ२असि ।। मह
स्तेसतोमहिमापनस्यतेद्धादेवमहाँ२असि
।।१३। बट्सूर्य्यश्रवसामहाँ२असिसत्रा
देवमहाँ२असि ।। मन्न्हादेवानामसुर्य्यः पुरो
हितोव्विभुज्ज्योतिरदाब्भ्यम् ।।१४।।
श्रायन्त ऽइवसूर्य्यंव्विश्श्वेदिन्द्रस्यभक्षत ।।
व्वसूनिजातेजनमान ऽओजसाप्रतिभागन्न
दीधिम ।।१५।। अद्यादेवा ऽउदितासूर्य्यस्य
निरꣳहसꣳ पिपृतानिरवद्यात् ।। तन्नोमित्रो
व्वरुणोमामहन्तामदितिꣳ सिन्धुः पृथिवी
ऽउतद्यौः ।।१६।। आकृष्ष्णेनरजसाव्वर्त्त

मानोनिवेशयन्नमृतम्मर्त्यञ्च ।। हिरण्ययेन
सवितारथेनादेवोयातिभुवनानिपश्यन् ।।१७।।
शु.यजुर्वेद अध्याय-३३ (३० से ४३ तक)

इति रुद्रे चतुर्थोऽध्यायः ।।४।।

अथ पञ्चमोऽध्यायः

हरिः ॐ ।। नमस्तेरुद्रमन्न्यवऽउतोतऽ
इषवेनमः ।। बाहुब्भ्यामुततेनमः ।।१।।
यातेरुद्रशिवातनूरघोरापापकाशिनी ।।
तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाक
शीहि ।।२।। यामिषुङ्गिरिशन्तहस्तेबिभ
र्ष्यस्तवे ।। शिवाङ्गिरित्रताङ्कुरुमाहिꣳ
सीꣳ पुरुषञ्जगत् ।।३।। शिवेनव्वचसात्त्वा
गिरिशाच्छावदामसि ।। यथानꣳ सर्व्वमिज्ज
गदयक्ष्मꣳ सुमनाऽअसत् ।।४।। अद्ध्य
वोचदधिवक्ताप्प्रथमोदैव्व्योभिषक् ।। अँही
श्श्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्श्चयातुधान्न्यो
धराचीꣳ परासुव ।।५।। असौयस्ताम्रोऽ

अरुण ऽउतबब्भ्रु ऽ सुमङ्गल÷ ।। येचैन ६ः
रुद्रा ऽअभितोदिक्षुश्रिता ऽ सहस्त्रशोवैषा ७
हेडऽईमहे ।।६ ।। असौयोवसर्प्पतिनीलग्ग्री
वोव्विलोहित ८ं ।। उतैनङ्गोपा ऽअदृश्श्रन्न
दृश्श्रन्नुदहार्य्य ८ं सदृष्ट्टोमृडयातिन ८ं ।।७ ।।
नमोऽस्तुनीलग्ग्रीवायसहस्त्राक्षायमीढुषे ।।
अथोये ऽअस्यसत्वानोहन्तेब्भ्योकरन्नम÷
।।८ ।। प्रमुञ्चधन्न्वनस्त्वमुभयोरात्त्न्योर्
ज्ज्याम् ।। याश्श्चतेहस्त ऽइषव ८ं पराता
भगवोव्वप ।।६ ।। व्विज्ज्यन्धनु÷कपर्द्दिनो
व्विशल्ल्योबाणवाँ २उत ।। अनेशन्नस्य
या ऽइषव ऽआभुरस्यनिषङ्गाधि ऽ ।।१० ।।
याते। हेतिम्मींढुष्टमहस्तेबभूवंतेधनु÷ ।
तयास्म्मान्न्विश्श्वतस्त्वमयक्ष्म्मयापरिभुज
।।११ ।। परितेधन्न्वनोहेतिरस्म्मान्न्वृणक्तु
व्विश्श्वत÷ ।। अथोय ऽइषुधिस्तवारे ऽ

अस्म्मन्निधेहितम् ।।१२।। अवतत्त्य
धनुष्ट्वᳬ सहस्स्राक्षशतेषुधे ।। निशीर्य्य
शल्ल्यानाम्मुखाशिवोन÷सुमनाभव ।।१३।।
नमस्त्त ऽआयुधायानाततायधृष्ष्णवे ।।
उभाब्भ्यामुततेनमोबाहुब्भ्यान्तवधन्न्व
ने ।।१४।। मानोमहान्तमुतमानोऽअब्र्भ
कम्मानऽउक्षन्तमुतमानऽउक्षितम् ।। मानो
व्वधीᳬ पितरम्मोतमातरम्मान÷प्प्रियास्त्त
न्न्वोरुद्द्ररीरिषᳬ ।।१५।। मानस्त्तोके तनये
मानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरी
रिषᳬ ।। मानोव्वीरान्रुद्द्रभामिनोव्वधीर्ह
विष्म्मन्तᳬ सदमित्त्वाहवामहे ।।१६।। नमो
हिरण्ण्यबाहवे सेनान्न्येदिशाञ्चपतये
नमोनमोव्वृक्षेब्भ्योहरिकेशेब्भ्यᳬ पशूना
म्पतयेनमोनम÷शष्प्पिञ्जरायत्त्विषीमते
पथीनाम्पतयेनमोनमोहरिकेशायोपवीतिने

पुष्टानाम्पतयेनमोनमोबब्भ्लुशाय ।।१७।।
नमोबब्भ्लुशाय व्याधिनेन्नानाम्पतयेनमो
नमोभवस्यहेत्यैजगताम्पतयेनमोनमोरुद्रायो
ततायिनेक्षेत्राणाम्पतयेनमोनमः सूतायाहन्त्यै
व्वनानाम्पतयेनमोनमोरोहिताय ।।१८।।
नमोरोहिताय स्थपतयेव्वृक्षाणाम्पतयेनमो
नमोभुवन्तयेव्वारिवस्कृतायौषधीनाम्पतये
नमोनमोमन्त्रिणेव्वाणिजायकक्षाणाम्पतयेनमो
नमऽउच्चैर्ग्घोषायाक्क्रन्दयतेपत्तीनाम्पतये
नमोनमः कृत्स्नायतया ।।१९।। नमः
कृत्स्नायतया । धावतेसत्त्वनाम्पतयेनमो
नमः सहमानायनिव्व्याधिनऽआव्व्याधिनी
नाम्पतयेनमोनमोनिषङ्गिणेककुभायस्तेना
नाम्पतयेनमोनमोनिचेरवेपरिचरायारण्ण्या
नाम्पतयेनमोनमोव्वञ्चते ।।२०।। नमोव्व
ञ्चते परिव्वञ्चतेस्तायूनाम्पतयेनमोनमो

निषङ्गिण ऽइषुधिमतेतस्कराणाम्पतये
नमोनमः सृकायिब्भ्योजिघा ᳪ सद्भ्यो
मुष्णताम्पतयेनमोनमोसिमद्भ्योनक्तक्त
ञ्चरद्भ्योविकृन्तानाम्पतयेनमः ।।२१।।
नम ऽउष्णीषिणे गिरिचरायकुलुञ्चा
नाम्पतयेनमोनम ऽइषुमद्भ्यो धन्वायि
भ्यश्च वोनमोनम ऽआतन्वानेभ्यः
प्रतिदधानेभ्यश्च वो नमोनम ऽआयच्छ
द्भ्योस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः
।।२२।। नमोविसृजद्भ्योविद्ध्यद्भ्यश्च
वोनमोनमः स्वपद्भ्योजाग्रद्भ्यश्चवो
नमोनम ᳪ शयानेभ्य ऽआसीनेभ्यश्चवो
नमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमो
नमः सभाभ्यः ।।२३।। नमः सभाभ्यः
सभापतिभ्यश्चवोनमोनमोश्वेभ्यो
श्वपतिभ्यश्चवो नमोनम ऽआव्या

धिनीब्भ्योव्विविद्ध्यन्तीब्भ्यश्श्चवोनमो
नमऽउगणाब्भ्यस्तृꣳहतीब्भ्यश्श्चवो नमो
नमोगणेब्भ्य÷ ।।२४।। नमोगणेब्भ्यो
गणपतिब्भ्यश्श्चवोनमोनमोव्व्रातेब्भ्यो
व्व्रातपतिब्भ्यश्श्चवोनमोनमोगृत्सेब्भ्यो
गृत्सपतिब्भ्यश्श्चवोनमोनमोव्विरूपेब्भ्यो
व्विश्श्वरूपेब्भ्यश्श्चवोनमोनमꣳसेनाब्भ्यꣳ
।।२५।। नमꣳसेनाब्भ्यꣳ सेनानिब्भ्यश्श्च
वोनमोनमोरथिब्भ्योऽअरथेब्भ्यश्श्चवो
नमोनम÷क्षत्तृब्भ्य÷सङ्गृहीतृब्भ्यश्श्च
वोनमोनमोमहद्भ्योऽअर्ब्भकेब्भ्यश्श्चवो
नम÷ ।।२६।। नमस्तक्षब्भ्योरथकारेब्भ्य
श्श्चवोनमोनमꣳकुलालेब्भ्यꣳकर्म्मारेब्भ्य
श्श्चवोनमोनमोनिषादेब्भ्य÷पुञ्जिष्ठे
ब्भ्यश्श्चवोनमोनम÷श्श्वनिब्भ्योमृग
युब्भ्यश्श्चवोनमोनमꣳश्श्वब्भ्य÷ ।।२७।।

नमᳲ श्वब्भ्य ᳲ। श्वपतिब्भ्यश्श्चवोनमो नमौभवायचरूद्द्रायचनम÷शर्व्वायचपशु पतयेचनमोनीलग्ग्रीवायचाशितिकण्ण्ठा यचनम÷कपर्द्दिने ।।२८।। नम÷कपर्द्दिने चव्युप्तकेशायचनम÷सहस्राक्षायचशत धन्न्वनेचनमोगिरिशयायचाशिपिविष्ट्टाय चनमोमीढुष्ट्टमायचेषुमतेचनमोह्रस्वाय ।।२९।। नमोह्रस्वाय चव्वामनायचनमो बृहतेचव्वर्षीयसेचनमोवृद्धायचसवृधेचनमो ग्ग्रायचप्प्रथमायचनमऽआशवे ।।३०।। नमऽआशवे चाजिरायचनमᳲशीग्घ्याय चशीब्भ्यायचनमऽऊम्म्योयचावस्वन्न्याय चनमोनादेयायचद्वीप्प्यायच ।।३१।। नमों ज्ज्येष्ठाय चकनिष्ठायचनम÷पूर्व्वजायच परजायचनमोमद्ध्यमायचापगल्भायचनमों जघन्न्यायचबुध्न्यायचनमᳲसोभ्भ्याय

।।३२।। नमः सोब्भ्याय चप्प्रतिसर्य्याय च नमोयाम्म्याय चक्षेम्म्याय च नमः श्लोक्याय चावसान्न्याय च नमऽउर्व्वर्य्याय च खल्ल्याय च नमोव्वन्न्याय ।।३३।। नमोव्वन्न्याय च कक्क्ष्याय च नमः श्रवाय च प्प्रति श्रवाय च नमऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च नमो बिल्म्मिने ।।३४।। नमो बिल्म्मिने चकवचिने च नमो व्वर्म्मिणे च व्वरूथिने च नमः श्श्रुताय च श्श्रुतसेनाय च नमो दुन्दुब्भ्याय चाहनन्न्याय च नमो धृष्ष्णवे ।।३५।। नमो धृष्ष्णवे चप्प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्न्वने च ।।३६।। नमः स्स्रुत्त्याय च पत्थ्याय च नमः काट्याय च नीप्प्याय च नमः कूल्ल्याय च सरस्याय च नमो नादेयाय च व्वैशन्ताय च नमः कूप्प्याय

।।३७।। नमꣳ कूप्प्याय चावट्ट्यायचनमौ
व्वीद्ध्र्यायचातप्प्यायच नमोमेग्घ्यायच
व्विद्युत्यायचनमोव्वर्ष्यायचावर्ष्यायचनमो
व्वात्याय।।३८।। नमोव्वात्याय चरेष्म्याय
चनमौव्वास्तव्व्यायचवास्तुपायचनमꣳ
सोमायचरूद्द्रायचनमस्ताम्म्रायचारुणायच
नमः शङ्गवे।।३९।। नमः शङ्गवे चपशु
पतयेचनमऽउग्ग्रायचभीमायचनमोग्ग्रेव
धायचदूरेवधायचनमौहन्त्रेचहनीयसेचनमो
व्वृक्षेब्भ्योहरिकेशेब्भ्योनमस्ताराय।।४०।।
नमः शम्भवाय चमयोभवायचनमः
शङ्करायचमयस्करायचनमः शिवायचाशिव
तरायच।।४१।। नमꣳ पार्य्याय चावार्य्याय
चनमः प्रतरणायचोत्तरणायचनमस्तीर्त्थ्या
यचकूल्ल्यायचनमꣳ शष्प्यायचफेन्न्यायच
नमः सिकत्त्याय ।।४२।। नमः सिक

त्याय चप्रवाह्याय चनम ÷ कि ६ शिलाय
चक्षयणायचनमं ÷ कपर्द्दिनेचपुलस्तयेच
नमंऽइरिण्यायचप्रपत्थ्यायचनमोव्व्रज्ज्याय
।।४३।। नमोव्व्रज्ज्याय चगोष्ठ्याय च
नमस्तल्प्प्यायचगेह्यायचनमोहृदय्य्यायच
निवेष्प्यायचनमःकाट्यायचगह्वरेष्ठायच
नमःशुष्क्क्याय ।।४४।। नमःशुष्क्क्याय
चहरित्यायचनमं ÷ पाᳫसव्यायचरजस्याय
चनमोलोप्प्यायचोल्लप्प्यायचनमऽऊर्व्व्याय
चसूर्व्व्यायचनम ÷ पर्ण्णाय ।।४५।। नमं ÷
पर्ण्णाय चपर्णशदायचनमऽउद्गुरमाणाय
चाभिघ्नतेचनमऽआखिदतेचप्रखिदतेच
नमंऽइषुकृद्भयोधनुष्कृद्भयᳫश्चवोनमोनमो
वःकिरिकेब्भ्योदेवाना ६ हृदयेब्भ्योनमो
विचिन्न्वत्केब्भ्योनमोविक्षिणत्केब्भ्यो
नमंऽआनिर्हतेब्भ्य ÷ ।।४६।। द्रापेऽ

अन्धसस्प्पतेदरिद्रनीललोहित ।। आ
साम्प्रजानामेषाम्पशूनाम्माभेर्म्मारोङ्मो
चनꣳकिञ्चनाममत् ।।४७।। इमारुद्राय
तवसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमती ।।
यथाशमसद्द्विपदेचतुष्पदेव्विश्श्वम्पुष्टङ्
ग्रामेऽअस्म्मिन्ननातुरम् ।।४८।। यातेरुद्र
शिवातनूः शिवाव्विश्श्वाहाभेषजी ।। शिवा
रुतस्यभेषजीतयानोमृडजीवसे ।।४९।।
परिनोरुद्रस्यहेतिव्वृर्णक्तुपरित्त्वेषस्यदुर्म्मति
रघायोः ।। अवस्थिरामघवद्भ्यस्तनुष्ष्व
मीढ्वस्तोकायतनयायमृड ।।५०।। मीढुष्ट
मशिवतम शिवोनꣳसुमनाभव ।। परमे
व्वृक्षऽआयुधन्निधायकृत्तिंव्वसानऽआचरपि
नाकम्बिबभ्रदागहि ।।५१।। व्विकिरिद्रव्वि
लोहितनमस्तेऽअस्तुभगवः ।। यास्तेसहस्रꣳ
हेतयोन्न्यमस्म्मन्निवपन्तुताः ।।५२।। सहस्रा

णिसहस्रशोबाह्वोस्तवहेतय÷ ।। तासामीशा नोभगवꣳ पराचीनामुखाकृधि ।।५३ ।। असङ्ख्यातासहस्राणि येरुद्रा ऽअधि भूम्म्याम् ।। तेषाꣳ सहस्रयोजनेवधन्न्वानित न्न्मसि ।।५४ ।। अस्म्मिन्न्महत्त्यण्णवेन्त रिक्षेभवा ऽअधि ।। तेषाꣳ सहस्रयोजने वधन्न्वानितन्नमसि ।।५५ ।। नीलग्ग्रीवाꣳ शितिकण्ठादिवꣳ रुद्रा ऽउपश्श्रिता ऽ ।। तेषाꣳ सहस्रयोजनेवधन्न्वानितन्न्मसि ।।५६ ।। नीलग्ग्रीवाꣳ शितिकण्ठाꣳ शर्व्वा अध ऽ क्षमाचरा ऽ ।। तेषाꣳ सहस्रयोजने वधन्न्वानितन्न्मसि ।।५७ ।। येव्वृक्षेषु शष्प्पिञ्जरानीलग्ग्रीवाव्विलोहिताꣳ ।। तेषांꣳ सहस्रयोजनेवधन्न्वानितन्न्मसि ।।५८ ।। येभूतानामधिपतयोव्विशिखा स÷कपर्द्दिन÷ । तेषाꣳ सहस्रयोजनेवध

न्वानितन्नमसि ।।५९।। येपथाम्पथिरक्षय
ऽऐलवृदाऽआयुर्य्युध÷ ।। तेषा॑सहस्त्रयोज
नेवधन्नवानितन्नमसि ।।६०।। येतीर्त्था
निप्प्रचरन्तिसृकाहस्तानिषङ्गिण÷ ।। तेषा॑
सहस्त्रयोजनेवधन्न्वानितन्नमसि ।।६१।।
येन्नेषु । व्विविद्ध्यन्तिपात्रेषुपिबतोजनान् ।।
तेषा॑सहस्त्रयोजनेवधन्न्वानितन्नमसि
।।६२।। यऽएतावन्तश्च्चभूया॑सश्च्च
दिशोरुद्द्रावितस्त्थिरे ।। तेषा॑सहस्त्रयोजने
वधन्न्वानितन्नमसि ।।६३।। नमोस्तु रुद्द्रे
ब्भ्योयेदिवियेषांव्वर्षमिषव॑ ।। तेब्भ्योदश
प्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्द
शोर्द्धर्वा÷ ।। तेब्भ्योनमोऽअस्तुतेनोवन्तुते
नोमृडयन्तुतेयन्द्विष्मोयश्च्चनोद्वेष्ट्तिमे
षाञ्जम्भेदध्म॑ ।।६४।। नमोस्तुरुद्द्रे
ब्भ्योयेन्तरिक्षेयेषांव्वातऽइषव॑ ।। तेब्भ्यो

दशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदी
चीर्द्दशोद्ध्वर्वा ऽ ।। तेब्भ्योनमोऽअस्तुतेनोव्व
न्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च्चनोद्द्वेष्ट्टित
मेषाञ्जम्भेदध्ध्म ᳲ ।।६५।। नमोस्तुरुद्द्रे
ब्भ्योयेपृथिव्व्यांय्येषामन्नमिषवᳲ । तेब्भ्यो
दशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदी
चीर्द्दशोद्ध्वर्वा ऽ । तेब्भ्योनमोऽअस्तुतेनो
वन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च्चनो
द्द्वेष्ट्टितमेषाञ्जम्भेदध्ध्म ᳲ ।।६६।।

शु.यजुर्वेद अध्याय-१६ (१ से ६६ तक)

इति रुद्रे पञ्चमोऽध्यायः ।।५।।

अथ षष्ठोऽध्यायः

हरिः ॐ ।। व्वय ᳲ सोमव्व्रतेतवमन
स्तनूषुबिब्भ्रत ᳲ ।। प्रजावन्त ᳲ सचेमहि
।।१।। एषते रुद्द्रभाग ᳲ सहस्वस्राम्बिकया
तञ्जुषस्वस्वाहैषतेरुद्द्र भाग ऽआखुस्ते
पशुः ।।२।। अवरुद्द्रमदीमह्यवदेवन्त्र्यम्ब

कम् ।। यथानोव्वस्यसस्क्करद्यथान ॆ श्श्रेय
सस्क्करद्यथानोव्व्यवसाययर्यात् ।।३।। भेषज
मसिभेषजङ्ग्गवे श्श्वायपुरुषायभेषजम् ।।
सुखम्मेषायमेष्ष्यै ।।४।। त्र्यम्बकंय्यजामहे
सुगन्धिम्पुष्ट्टिवर्द्धनम् । उर्व्वारुकमिव
बन्धनान्न्मृत्योर्म्मुक्षीयमामृतात् ।। त्र्यम्बकं
य्यजामहेसुगन्धिम्पतिवेदनम् ।। उर्व्वारु
कमिवबन्धनादितोमुक्षीयमामुत ॆ ।।५।।
एतत्ते रुद्द्रावसन्तेनपरोमूजवतोतीहि ।।
अवततधन्न्वापिनाकावस ॆ कृत्तिवासाऽअ
हिंꣳसन्न ॆ शिवोतीहि ।।६।। त्र्यायुषञ्ज
मदग्ग्ने ॆ कश्यपस्यत्र्यायुषम् । यद्देवेषुत्र्या
युषन्तन्नोऽअस्तुत्र्यायुषम् ।।७।। शिवोनामा
सिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳ
सी ॆ ।। निवर्त्तयाम्म्यायुषेन्नाद्यायप्प्रजननना
यरायस्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ।।८।।

शु.यजुर्वेद अध्याय-३ (५६ से ६३ तक)

इति रुद्रेषष्ठोऽध्यायः ।।६।।

अथ सप्तमोऽध्यायः

हरिः ॐ उग्रश्श्च भीमश्श्चध्ध्वान्त श्श्चधुनिश्श्च। सासव्हाँश्श्चाभियुग्वाच विक्षिपः स्वाहा॥१॥ अग्नि हृदयेनाश निं हृदयाग्ग्रेणपशुपतिङ्कृत्स्नहृदयेनभवं य्यक्ना॥ शर्व्वम्मतस्नाभ्यामीशानम्म न्युनामहादेवमन्तः पर्शव्व्येनोग्ग्रन्देवंव्व निष्ठुनाव्विसिष्ठहनुः शिङ्गीनिकोश्या भ्याम्॥२॥ उग्रंल्लोहितेनमित्त्रं सौव्रत्त्ये नरुद्द्रन्दौर्व्रत्येनेद्द्रम्प्रक्रीडेनमरुतोबलेन साद्धयान्प्रमुदा॥ भव्वस्यकण्ठं रुद्द्र स्यान्तः पार्श्व्यम्महादेवस्ययकृच्छर्व्वस्यव्व निष्ठुः पशुपतेः पुरीतत्॥३॥ लोमभ्यः स्वाहा लोमभ्यः स्वाहात्त्वचेस्वाहा त्त्वचेस्वाहालोहितायस्वाहालोहितायस्वा मेदोभ्यः स्वाहामेदोभ्यः स्वाहा। मा

सेभ्य ँ स्वाहामा ँ सेभ्य ँ स्वाहास्नाव
भ्य ँ स्वाहास्नावभ्य ँ स्वाहास्थभ्य ँ
स्वाहास्थभ्य ँ स्वाहामज्जभ्य ँस्वाहामज्ज
भ्य ँ स्वाहा ।। रेतसेस्वाहापायवेस्वाहा
।।४।। आयासायस्वाहा प्रायासायस्वाहा
संय्यासायस्वाहाव्वियासायस्वाहोद्यासाय
स्वाहा ।। शुचेस्वाहाशोचतेस्वाहाशोच
मानायस्वाहाशोकायस्वाहा ।।५।। तपसे
स्वाहातप्यतेस्वाहातप्यमानायस्वाहा
तप्तायस्वाहाघर्म्मायस्वाहा । निष्कृत्यै
स्वाहाप्रायश्चित्त्यै स्वाहाभेषजाय
स्वाहा ।।६।। यमायस्वाहान्तकायस्वाहा
मृत्यवेस्वाहा ।। ब्रह्मणेस्वाहाब्रह्महत्यायै
स्वाहाव्विश्वेभ्योदेवेभ्य ँ स्वाहाद्यावा
पृथिवीभ्या ँ स्वाहा ।।७।।

शु.यजुर्वेद अध्याय-३९ (७ से १३ तक)

इति रुद्रे सप्तमोऽध्यायः ।।७।।

हरिः ॐ व्वाजश्च । मे प्रसवश्चमे प्रयतिश्चमेप्रसितिश्चमेधीतिश्चमेक्क्रतुश्चमेस्वरश्चमेश्लोकश्चमेश्श्रवश्चमेश्श्रुतिश्चमेज्ज्योतिश्चमेस्वश्चमेयज्ञेन कल्प्पन्ताम् ।।१।। प्राणश्चे । मेपानश्चमे व्यानश्चमेसुश्चमेचित्तञ्चमऽआधीतञ्चमे व्वाक्चमे मनश्चमे चक्षुश्चमे श्श्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनकल्प्पन्ताम् ।।२।। ओजश्च । मेसहश्चमऽआत्त्माचमेतनूश्चमेशर्म्मचमेव्वर्म्मचमेङ्गानिचमेस्थीनिचमेपरूꣳषिचमेशरीराणिचमऽआयुश्चमेजराचमेयज्ञेनकल्प्पन्ताम् ।।३।। ज्ज्यैष्ठ्यञ्च । मऽआधिपत्त्यञ्चमे मन्न्युश्चमेभामश्चमेमश्चमेम्भश्च मेजेमाचमेमहिमाचमेव्वरिमाचमेप्रथिमाचमे

व्वर्षिमाचमेद्द्राघिमाचमेव्वृद्धञ्चमेव्वृद्धिश्श्च
मेयज्ञेनकल्प्पन्ताम् ।।४।। (नं.१)। सत्त्य
ञ्चं। मेश्रद्धाचमेजगच्चमेधनञ्चमेव्विश्श्वञ्च
मेमहश्श्चमेक्क्रीडाचमेमोदश्श्चमेजातञ्चमे
जनिष्ष्यमाणञ्चमेसूक्त्तञ्चमेसूकृतञ्चमे
यज्ञेनकल्प्पन्तानम् ।।५।। ऋतञ्चं। मेमृतञ्च
मेयक्ष्मञ्चमेनामयच्चमेजीवातुश्श्चमेदीर्घायु
त्वञ्चमेनमित्त्रञ्चमेभयञ्चमेसुखञ्चमेशय
नञ्चमेसूषाश्च्चमेसुदिनञ्चमेयज्ञेनकल्प्प
न्ताम् ।।६।। यन्ताचं। मेधर्त्ताचमेक्षेमं
श्श्चमेधृतिश्श्चमेव्विश्श्वञ्चमेमहश्श्च
मेसंव्विच्चमेज्ञात्त्रञ्चमेसूश्श्चमेप्रसूश्श्चमे
सीरञ्चमेलयश्श्चमेयज्ञेनकल्प्पन्ताम् ।।७।।
शञ्चं। मेमयश्श्चमेप्प्रियञ्चमेनुकामश्श्च
मेकामश्श्चमेसौमनसश्श्चमेभगश्श्चमे
द्द्रविणञ्चमेभद्द्रञ्चमेश्श्रेयश्श्चमेव्वसीयश्च्चमे

यशश्च मे यज्ञेन कल्पन्ताम् ॥८॥(नं.२)॥
ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च
मे घृतञ्च मे मधु च मे सग्धिश्च मे सपीति
श्च मे कृषिश्च मे वृष्टिश्च मे जैत्रञ्च मऽ
औद्भिद्यञ्च मे यज्ञेन कल्पन्ताम् ॥९॥ रयि
श्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे
विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे
कुयवञ्च मेक्षितञ्च मेन्नञ्च मेक्षुच्च मे यज्ञेन
कल्पन्ताम् ॥१०॥ वित्तञ्च मे वेद्यञ्च
मे भूतञ्च मे भविष्यच्च मे सुगञ्च मे सुपत्थ्य
ञ्च मऽऋद्धञ्च मऽऋद्धिश्च मे क्लृप्त
ञ्च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च
मे यज्ञेन कल्पन्ताम् ॥११॥ व्रीहयश्च
मे यवाश्च मे माषाश्च मे तिलाश्च मे
मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च
मेणवश्च मे श्यामाकाश्च मे नीवाराश्च मे

गोधूमाश्श्चमेमसूराश्श्चमेयज्ञेनकल्प्पन्ता
म्।।१२।। (नं.३)। अश्माच। मेमृत्तिकाच
मेगिरयश्श्चमेपर्व्वताश्श्चमेसिकताश्श्चमेव्वन
स्प्पतयश्श्चमेहिरण्ण्यञ्चमेयश्श्चमेश्यामञ्चमे
लोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्प्पन्ता
म्।।१३।। अग्निश्श्च। मऽआपश्श्चमेव्वी
रुधश्श्चमऽओषधयश्श्चमेकृष्टपच्च्याश्श्च
मेकृष्टपच्च्याश्श्चमेग्राम्म्याश्श्चमेपशवआर
ण्याश्श्चमेव्वित्तञ्चमेव्वित्तिश्श्चमेभूतञ्चमे
भूतिश्श्चमेयज्ञेनकल्प्पन्ताम्।।१४।। व्वसुच।
मेव्वसतिश्श्चमेकर्म्मचमेशक्तिश्श्चमेर्थश्श्च
मऽएमश्श्चमऽइत्याचमेगतिश्श्चमेयज्ञेनकल्प्प
न्ताम्।।१५।।(नं.४)।। अग्निश्श्च। मइन्द्र
श्श्चमेसोमश्श्चमऽइन्द्रश्श्चमेसविताचमऽ
इन्द्रश्श्चमेसरस्वतीचमऽइन्द्रश्श्चमेपूषा
चमऽइन्द्रश्श्चमेबृहस्प्पतिश्श्चमऽइन्द्रश्श्चमे

यज्ञेनकल्पन्ताम् ।।१६।। मित्रश्च्च । मऽइन्द्र
श्च्चमेव्वरुणश्च्चमऽइन्द्रश्च्चमेधाताचमऽ
इन्द्रश्च्चमेत्त्वष्टाचमऽइन्द्रश्च्चमेमरुतश्च्च
मऽइन्द्रश्च्चमेव्विश्श्वेचमेदेवाऽइन्द्रश्च्चमे
यज्ञेनकल्पन्ताम् ।।१७।। पृथिवीच । मऽइन्द्र
श्च्चमेन्तरिक्षञ्चमऽइन्द्रश्च्चमेद्यौश्च्चमऽइन्द्र
श्च्चमेसमाश्च्चमऽइन्द्रश्च्चमेनक्षत्राणि
चमऽइन्द्रश्च्चमेदिशश्च्चमऽइन्द्रश्च्चमे
यज्ञेनकल्पन्ताम् ।।१८।। (नं.५) ।। अ६
शुश्च्च । मेरश्मिश्च्चमेदाब्भ्यश्च्चमेधि
पतिश्च्चमउपा६शुश्च्चमेन्तर्य्यामश्च्चम
ऽऐन्द्रवायवश्च्चमेमैत्रावरुणश्च्चमऽआ
श्श्विनश्च्चमेप्प्रतिप्प्रस्थानश्च्चमेशुक्रश्च्च
मेमन्थीचमेयज्ञेनकल्पन्ताम् ।।१६।। आ
ग्रयणश्च्च । मेव्वैश्श्वदेवश्च्चमेद्ध्रुवश्च्च
मेवैश्श्वानरश्च्चमऽऐन्द्राग्ग्नश्च्चमेमहा

वैश्श्वदेवश्च्चमेमरुत्वतीयाश्श्चमेनिष्क्कै
वल्ल्यश्च्चमेसावित्रश्श्चमेसारस्वस्तश्च्चमे
पात्न्कीवतश्च्चमेहारियोजनश्च्चमेयज्ञेन
कल्प्पन्ताम्।।२०।। स्रुचश्श्च। मेचमसा
श्श्चमेव्वायव्व्यानिचमेद्रोणकलशश्श्चमे
ग्ग्रावाणश्श्चमेधिषवणेचमेपूतभृच्चम ऽआ
धवनीयश्च्चमेव्वेदिश्श्चमेबर्हिश्श्चमे ऽव
भृथश्श्चमेस्वगाकारश्च्चमेयज्ञेनकल्प्पन्ता
म्।।२१।।(नं.६) अग्निश्श्च। मेघर्म्मश्श्च
मेक्कर्श्च्चमेसूर्य्यश्च्चमेप्प्राणश्च्चमेश्श्व
मेधश्चमेपृथिवीचमेदितिश्च्चमेदितिश्च्च
मेद्यौश्श्चमेङ्गुलय ंशक्क्वरयोदिशश्श्चमे
यज्ञेनकल्प्पन्ताम्।।२२।। व्व्रतञ्च। मऽ
ऋतवश्च्चमेतपश्च्चमेसंव्वत्सरश्च्चमेहो
रात्रेऽउर्व्वष्ठ्ठीवेबृहद्रथन्तरेचमेयज्ञेनकल्प्प
न्ताम्।।२३।। (नं.७)। एकाच। मेतिस्र

श्चमेतिस्रश्चमेपञ्चचमेपञ्चचमेसप्त
चमेसप्तचमेनवचमेनवचमऽएकादशचमऽ
एकादशचमेत्रयोदशचमेत्रयोदशचमेपञ्च
दशचमेपञ्चदशचमेसप्तदशचमेसप्तदश
चमेनवदशचमेनवदशचमऽएकविꣳशति
श्चमऽएकविꣳशतिश्चमेत्रयोविꣳशति
श्चमेत्रयोविꣳशतिश्चमेपञ्चविꣳशति
श्चमेपञ्चविꣳशतिश्चमेसप्तविꣳशति
श्चमेसप्तविꣳशतिश्चमेनवविꣳशतिश्च
मेनवविꣳशतिश्चमऽएकत्रिꣳशच्चमऽ
एकत्रिꣳशच्चमेत्रयस्त्रिꣳशच्चमेयज्ञेनकल्प
न्ताम्।।२४।।(न.८)।। चतस्रश्च। मेष्टौ
चमेष्टौचमेद्वादशचमेद्वादशचमेषोडशचमे
षोडशचमेव्विꣳशतिश्चमेव्विꣳशतिश्च
मेचतुर्व्विꣳशतिश्चमेचतुर्विꣳशतिश्च
मेष्टाविꣳशतिश्चमेष्टाविꣳशतिश्चमे

द्वात्रि꣫ शच्चमेद्वात्रि꣫ शच्चमेषड्त्रि꣫ श
च्चमेषड्त्रि꣫ शच्चमेचत्त्वारि꣫ शच्चमेचत्त्वा
रि꣫ शच्चमेचतु꣡श्चत्वारि꣫ शच्चमेचतु
श्चत्वारि꣫ शच्चमेष्टाचत्त्वारि꣫ शच्चमे
यज्ञेनकल्पन्ताम् ।।२५।।(नं.९)।। त्र्य
विश्च्च। मेत्र्यवीचमेदित्त्यवाट्चमेदित्त्यौही
चमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्सश्च्च
मेत्रिव्वत्साचमेतुर्य्यवाट्चमेतुर्य्यौहीचमेयज्ञेन
कल्पन्ताम् ।।२६।। पष्ठवाट्च। मेपष्ठौ
हीचमऽउक्षाचमेव्वशाचमऽऋषभश्च्च
मेव्वेहश्च्चमेनड्वाँश्च्चमेधेनुश्च्चमेयज्ञेन
कल्पन्ताम् ।।२७।।(नं.१०) व्वाजायस्वाहा।
प्रसवायस्वाहापिजायस्वाहाक्क्रतवेस्वाहा
व्वसवेस्वाहाहर्प्पतयेस्वाहान्न्हेमुग्ग्धाय
स्वाहामुग्ग्धायवैन꣫ शिनायस्वाहाव्विन꣫
शिनऽआन्त्यायनायस्वाहान्त्यायभौवनाय

स्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहा
प्रजापतयेस्वाहा ।। इयन्तेराण्मित्राययन्ता
सियमन ऽऊर्ज्जेत्वावृष्ट्यैत्वाप्रजानान्त्वा
धिपत्याय ।।२८।। आयुर्य्यज्ञेन । कल्पता
म्प्राणोयज्ञेनकल्पताञ्चक्षुर्य्यज्ञेनकल्प
ताꣳश्रोत्रंयज्ञेनकल्पतांव्वाग्यज्ञेनकल्प
ताम्मनोय्यज्ञेनकल्पतामात्मायज्ञेनकल्प
ताम्ब्रह्मायज्ञेनकल्पताञ्ज्योतिर्य्यज्ञेनकल्प
ताꣳस्वर्य्यज्ञेनकल्पताम्पृष्ठंय्यज्ञेनकल्प
तांयज्ञोयज्ञेनकल्पताम् ।। स्तोमश्चयजुश्च
ऋक्चसामचबृहच्चरथन्तरञ्च ।। स्वर्
देवा ऽअगन्मामृता ऽअभूमप्रजापतेः
प्रजा ऽअभूमव्वेट्स्वाहा ।।२९।। शु.य.अध्याय १८ (१ से २९ तक)

इति रुद्रे अष्टमोऽध्यायः ।।८।।

अथ रुद्रशान्त्याध्यायः ।।९।।

हरिः ॐ । ऋचंव्वाचम्प्रपद्येमनोयजुः
प्रपद्येसामप्राणाम्प्रपद्येचक्षुः श्रोत्रम्प्रपद्ये ।।

व्वागोर्ज÷सहौजोमयिप्प्राणापानौ ।।१।।
यन्न्मेछिद्द्रञ्चक्षुषोहृदयस्यमनसोव्वाति
तृणम्बृहस्प्पतिर्म्मेतद्दधातु ।। शन्नोभवतुभुव
नस्ययस्प्पति÷ ।।२।। भूर्ब्भुवꣳस्व÷ ।
तत्त्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि ।।
धियोयोन÷प्प्रचोदयात् ।।३।। कयानश्चित्र
त्रऽआभुवदूतीसदावृधꣳसखा ।। कयाश
चिष्ट्ठयाव्वृता ।।४।। कस्त्वा सत्त्योमदा
नाम्मꣳहिष्ट्ठोमत्सदन्धसꣳ ।। दृढाचिदारुजे
व्वसु ।।५।। अभीषुणꣳ सखीनामविता
जरितृट्णाम् ।। शतम्भवास्यूतिभि÷ ।।६।।
कयात्वन्नऽऊत्याभिप्प्रमन्दसेव्वृषन् ।। कया
स्तोतृब्भ्यऽआभर ।।७।। इन्द्रोव्विश्श्वस्य
राजति ।। शन्नोऽअस्तुद्विपदेशञ्चतुष्प्पदे
।।८।। शन्नोमित्त्र꣡शंव्वरुणꣳशन्नोभवत्त्वर्य्य
मा ।। शन्नऽइन्द्रोबृहस्प्पति꣡शन्नोव्विष्णु

रुरुक्रमः ।।९।। शन्नोव्वातः पवता ँ
शन्नस्तपतुसूर्य्यः ।। शन्नं कनिक्क्रदद्दे
वं पर्ज्जन्न्यो ऽअभिवर्षतु ।।१०।। अहा
निशम्भवन्तुनं शं रात्री ं प्प्रतिधीयताम् ।।
शन्न ऽइन्द्राग्ग्नी भवतामवोभि ं शन्न ऽइन्द्रा
वरुणारातहव्व्या ।। शन्न ऽइन्द्रापूषणाव्वाज
सातौशमिन्द्रासोमासुवितायशंय्योः ।।११।।
शन्नोदेवी रभिष्ट्टय ऽआपोभवन्तुपीतये ।।
शंय्योरभिस्स्रवन्तुनः ।।१२।। स्योनापृथिवि
नोभवान्नृक्षरानिवेशनी ।। यच्छानं शर्म्मस
प्रथाः ।।१३।। आपोहिष्ठामयोभुवस्तान ऽ
ऊर्ज्जेदधातन ।। महेरणायचक्षसे ।।१४।।
योवः शिवतमोरसस्तस्यभाजयतेहनः ।।
उशतीरिवमातरः ।।१५।। तस्म्मा ऽअर
ङ्गमामवोयस्यक्षयायजिन्वथ ।। आपोज
नयथाचनं ।।१६।। द्यौः शान्तिरन्तरिक्ष ँ

शान्ति÷पृथिवीशान्तिरापः शान्तिरोषधयः शान्ति÷ ।। व्वनस्प्पतयः शान्तिर्व्विश्श्वेदेवाः शान्तिर्ब्ब्रह्मशान्तिः सर्व्वं शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ।।१७।।

दृतेदृं हमामित्त्रस्यमाचक्षुषासर्व्वाणिभूतानिसमीक्षन्ताम् ।। मित्त्रस्याहञ्चक्षुषा सर्व्वाणिभूतानिसमीक्षे ।। मित्त्रस्यचक्षुषा समीक्षामहे ।।१८।। दृतेदृं हमा ।। ज्योक्त्ते सन्दृशिजीव्व्यासञ्ज्योक्त्तेसन्दृशिजीव्यासम् ।।१९।। नमस्तेहरसेशोचिषेनमस्ते ऽअस्त्वर्च्चिषे ।। अन्न्यांस्ते ऽअस्म्मत्तपन्तुहेतय÷ पावको ऽअस्म्मभ्यं शिवोभव ।।२०।।

नमस्ते । ऽअस्तुव्विद्युतेनमस्तेस्तनयित्नवे ।। नमस्तेभगवन्नस्तुयतः स्व÷समीहसे ।।२१।। यतोयतः समीहसेततोनो ऽअभयङ्कुरु ।। शन्न÷कुरुप्रजाभ्भ्योभयन्नः पशुभ्भ्य÷

।।२२।। सुमित्रियान ऽआप ऽओषधय ꣳ
सन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टि
यञ्चवंयन्द्विष्म्मः ।।२३।। तच्चक्षुर्देवहि
तम्पुरस्ताच्छुक्क्रमुच्चरत् ।। पश्येमशरदः
शतञ्जीवेमशरदः शत ꣳ श्रृणुयामशरदः
शतम्प्रब्ब्रवामशरदः शतमदीना ꣳ स्याम
शरदः शतम्भूयश्च्चशरदः शतात् ।।२४।।

शुक्ल यजुर्वेद अध्याय ३६ (१ से २४ तक)

इति रुद्रे शान्त्याध्यायः ।।

अथ रुद्रे स्वस्तिप्रार्थनामन्त्राऽध्यायः ।।

हरिः ॐ। स्वस्तिन ऽइन्द्रोव्वृद्धश्श्र
वाः स्वस्तिनः पूषाव्विश्श्ववेदा ꣳ ।। स्वस्ति
नस्तार्क्ष्योऽअरिष्टनेमि ꣳ स्वस्तिनोबृहस्प्पति
र्द्दधातु ।।१।।२५/१६ ॐ पयः पृथिव्याम्पय ऽओ
षधीषुपयोदिव्व्यन्तरिक्षेपयोधा ꣳ ।। पयस्वती ꣳ
प्प्रदिशः सन्तुमह्यम् ।।२।।१८/३६ ॐ व्विष्ण्णो
रराटमसिव्विष्ण्णोः श्नप्त्रेस्त्थोव्विष्ण्णा ꣳ
स्यूरसिव्विष्ण्णोर्ध्रुवोसि ।। व्वैष्ण्णवमसि

व्विष्ण्वेत्त्वा ।।३।।५/२१ ॐ अग्निर्द्देवताव्वातो देवतासूर्य्योदेवताचन्द्रमादेवताव्वसवोदेवता रुद्द्रादेवतादित्यादेवतामरुतोदेवताव्विश्श्वे देवादेवताबृहस्प्पतिर्द्देवतेन्द्रोदेवताव्वरुणो देवता ।।४।।१४/२० ॐ सद्योजातंप्रपद्यामिसद्योजा तायवैनमोनमः ।। भवेभवेनातिभवेभवस्व मांभवोद्भवायनमः ।।५।। वामदेवायनमो ज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालाय नमःकलविकरणायनमोबलविकरणाय नमो ।।६।। बलायनमोबलप्रमथनायनमः सर्व्वभूतदमनायनमोमनोन्मनायनमः ।।७।। अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ।। सर्व्वेभ्यःसर्व्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ।।८।। तत्पुरुषायविद्महेमहादेवायधीमहि ।। तन्नोरुद्रःप्रचोदयात् ।।६।। ईशानःसर्व विद्यानामीश्वरःसर्व्वभूतानाम् ।। ब्रह्माधि

पतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदा
शिवोम् ।।१०।। ॐ शिवोनामासिस्वधि
तिस्तेपितानमस्तेअस्तुमामाहि ६ सी ँ ।
निवर्त्तयाम्म्यायुषेन्नाद्यायप्रजननायरायस्पो
षायसुप्रजास्त्वायसुवीर्य्याय ।।११।। ३/६३ ॐ
व्विश्श्वानिदेवसवितर्दुरितानिपरासुव ।।
यद्भद्रन्तन्न ऽआसुव ।।१२।। ३०/३ ॐ द्यौ ः शान्ति
रन्तरिक्ष ६ शान्तिः पृथिवीशान्तिराप ँ
शान्तिरोषधय ँ शान्तिः ।। व्वनस्प्पतय ँ
शान्तिर्व्विश्श्वेदेवा ँ शान्तिर्ब्रह्मशान्ति ँ सर्व्व ६
शान्ति ँ शान्तिरेवशान्ति ँ सामाशान्तिरे
धि ।।१३।। ३६/१७ ॐ सर्वेषांवाएषव्वेदाना ७
रसोयत्सामसर्वेषामेवैनमेतद्वेदाना ७ रसे
नाभिषिञ्चति ।।१४।।

इति स्वस्तिप्रार्थनामन्त्राध्यायः ।।१०।।

ॐ शान्तिः शान्तिः शान्तिः ।। सुशान्तिर्भवतु । सर्वारिष्टशान्तिर्भवतु ।।

अनेनकृतेन रुद्राभिषेककर्मणा श्रीभवानीशङ्करमहारुद्रः । प्रीयतान्नमम ।।

ॐ साम्बसदाशिवार्पणमस्तु ।। इति ।।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य-
बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञ ᳬ
समिमन्दधातु विश्श्वेदेवास ऽइहमादयन्ता
मो३म्प्रतिष्ठ।। ॐ हृदयायनमः। २/१३

ॐ अबोद्ध्यग्नि॒ समिधाजनानाम्प्रति
धेनुमिवायतीमुषासम्। यह्वा ऽइवप्प्रवया
मुज्जिहानाः प्रभानवः सिस्रतेनाकमच्छ।।
ॐ शिरसे स्वाहा। १५/२४

ॐ मूर्द्धानन्दिवो ऽअरतिम्पृथिव्या-
व्वैश्श्वानरमृत ऽआजातमग्निम्। कवि ᳬ
सम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनय
न्तदेवा॒। ॐ शिखायै वषट्।। ३३/८

ॐ मर्म्माणितेव्वर्म्मणाच्छादयामिसो
मस्त्वाराजामृतेनानुवस्ताम्। उरोर्व्वरीयो
व्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु।।
ॐ कवचायहुम्।। १७/३३

ॐ व्विश्श्वतश्चक्षुरुतव्विश्श्वतोमुखोव्विश्व तोबाहुरुतव्विश्श्वतस्पात्। सम्बाहुब्भ्या न्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः।। ॐ नेत्रत्रयायवौषट्।।$\frac{१७}{१६}$

ॐ मानस्तोकेतनयेमानऽआयुषिमानो गोषुमानोऽअश्श्वेषुरीरिषः।। मानोव्वीरान्रुद्र भामिनोव्वधीर्हविष्मन्तःसदमित्त्वाहवा महे। ॐ अस्त्रायफट्।$\frac{१६}{१६}$

ॐ वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्।
वन्दे सूर्यशशांकवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम्।।
ॐ नमः पार्वतीपतये हर हर हर।।

।। तर्पण ।।

ॐ भवं देवं तर्पयामि। शर्व देवं तर्पयामि। ईशानं देवं तर्पयामि। पशुपतिं देवं तर्पयामि। उग्रम देवं तर्पयामि। रुद्रम देवं तर्पयामि। भीमं देवं तर्पयामि। महान्तं देवं तर्पयामि। भवस्य देवस्य पत्नीं तर्पयामि। शर्वस्य देवस्य पत्नीं तर्पयामि। उग्रस्य देवस्य पत्नीं तर्पयामि। रुद्रस्य देवस्य पत्नीं तर्पयामि। भीमस्य देवस्य पत्नीं तर्पयामि। महतो देवस्य पत्नीं तर्पयामि।

शतरूद्री विधान

षडंग न्यासः :- मनोजूतिरिति मन्त्रस्य बृहस्पतिर्ऋषिः बृहतीछन्दः बृहस्पतिर्देवता हृदयन्यासे जपे पाठे विनियोगः।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञ ꣳ समिमन्दधातुव्विश्श्वेदेवास ऽइहमादयन्तामो३म्प्रतिष्ठ ।। ॐ हृदयायनमः।

अबोद्ध्यग्निरितिमंत्रस्य बुधगविष्ठिराऋषिः अग्निर्देवता त्रिष्टुप्छन्दः शिरोन्यासेजपेविनियोगः।

ॐ अबोध्यग्निः समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम्। यह्वा ऽइवप्प्रवयामुज्जिहानाः प्रभानवः सिस्रतेनाकमच्छं।। ॐ शिरसे स्वाहा।

मूर्द्धानमितिमंत्रस्य भरद्वाजऋषिः अग्निर्देवता त्रिष्टुप्छन्दः शिखान्यासेजपेविनियोगः।।

ॐ मूर्द्धानन्दिवो ऽअरतिम्पृथिव्यावैश्श्वानरमृत ऽआजातमग्निम्। कविꣳ सम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः। ॐ शिखायै वषट्।।

मर्म्माणितइतिमंत्रस्य अप्रतिरथऋषिः मर्म्माणिदेवता विराट्छंदः कवचन्यासेजपेविनियोगः।।

ॐ मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम्। उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु।। ॐ कवचायहुम्।।

विश्वतश्चक्षुरितिमंत्रस्यविश्श्वकर्मा भौवनऋषिः विश्श्वकर्मा देवता त्रिष्टुप्छन्दः नेत्रन्यासेजपेविनियोगः।।

ॐ विश्श्वतश्चक्षुरुतविश्श्वतोमुखोविश्श्वतोबाहुरुत विश्श्वतस्पात्। सम्बाहुब्भ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः।। ॐ नेत्रत्रयायवौषट्।।

मानस्तोकइतिमन्त्रस्य परमेष्ठीऋषिः एकरुद्रोदेवता जगती छन्दः अस्त्रन्यासेजपेविनियोगः।

ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः।। मानोव्वीरान्नुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्त्वाहवामहे। ॐ अस्त्रायफट्।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं,
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।।

हरिः ॐ।। नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः।। बाहुब्भ्यामुततेनमः।।१।। यातेरुद्रशिवातनूरघोरापापकाशिनी।। तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि।।२।। यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे।। शिवाङ्गिरित्रताङ्कुरुमाहिंसीः पुरुषञ्जगत्।।३।। शिवेनव्वचसात्त्वागिरिशाच्छाव्वदामसि।। यथानः सर्व्वमिज्जगदयक्ष्मः सुमनाऽअसत्।।४।। अद्ध्यवोचदधिवक्ताप्रथमोदैव्व्योभिषक्।। अहींश्श्चसर्वाञ्जम्भयन्त्सर्व्वाश्श्चयातुधान्न्योधराचीः परासुव।।५।। असौयस्ताम्म्रोऽअरुणऽउतबब्भ्रुः सुमङ्गलः।। येचैनः रुद्राऽअभितोदिक्षुश्रिताः सहस्त्रशो

वैषा॑ᳫहेड॑ऽईमहे ।।६ ।। असौयो॑ऽव्वसर्प्पतिनील॑ग्ग्रीवो
विलो॑हित ᳪ।। उतैनङ्गोपा ऽअ॑दृश्श्रन्नदृ॑श्श्रन्नुदहार्य्य ᳪ सदृष्टो
मृ॑डयातिन ᳪ।।७ ।। नमो॑ऽस्तुनील॑ग्ग्रीवाय॑सहस्त्राक्षायमीढुषे॑।
अथोये ऽअ॑स्यसत्वा॑नोहन्तेब्भ्यो॑करन्नम॑ः ।।८ ।। प्रमुञ्च
धन्न्वं॑नस्त्वमुभयोरार्त्न्यो॑ज्ज्यार्म् ।। याश्श्चं॑तेहस्त ऽइषं॑व ᳪ
पराताभ॑गवोव्वप ।।९ ।। व्विज्ज्यन्धनु॑ःकपर्द्दिनोव्विशल्ल्यो
बाणवाँ२ ऽउत ।। अनेशन्नस्ययाऽइषं॑वआभुर॑स्यनिषङ्ग
धिᳪ ।।१० ।। याते॑ हेतिम्मी॑ढुष्टम ऽहस्ते॑बभूवं॑तेधनु॑ः ।
तयास्म्मान्न्विश्श्वतस्त्वम॑यक्ष्म्मयापरि॑भुज ।।११ ।। परि॑ते
धन्न्वं॑नोहेतिरस्म्मान्न्वृणक्तुव्विश्श्वत॑ः ।। अथोय ऽइषु
धिस्तवारे ऽअस्म्मन्निधे॑हितम् ।।१२ ।। अवतत्त्यधनुष्ट्व ᳪ
सह॑स्त्राक्षशते॑षुधे ।। निशीर्य्य॑शल्ल्यानाम्मुखा॑शिवो॑न ः
सुमना॑भव ।।१३ ।। नम॑स्त ऽआयु॑धायाना॑ततायधृष्ष्णवे॑ ।।
उभाब्भ्या॑मुततेनमो॑बाहुब्भ्यान्तवधन्न्वं॑ने ।।१४ ।। मानो॑
महान्तमुतमानो॑ऽअर्ब्भ॑कम्मान ऽउक्षन्तमुतमान॑ऽउक्षितम् ।।
मानो॑व्वधी ᳪ पितरम्मोत॑मातरम्मान॑ःप्प्रियास्तन्न्वोरुद्द्र
रीरिषᳪ ।।१५ ।। मान॑स्तोके । तन॑येमान ऽआयु॑षिमानो
गोषुमानो ऽअश्श्वे॑षुरीरिषᳪ ।। मानो॑व्वीरान्न्रु॑द्द्रभामिनोव्व॑
धीर्हविष्म॑न्त ᳪ सदमित्त्वा॑हवामहे ।।१६ ।। नमोहिर॑ण्य
बाहवे ।। सेनान्न्येदिशाञ्चपत॑येनमोनमो॑व्वृक्षेब्भ्योहरि॑
केशेब्भ्य ᳪ पशूनाम्पत॑येनमोनम ःशष्प्पिञ्जरा॑यत्त्विषीमते

पथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतये
नमोनमोबब्लुशाय ।।१७।। नमोबब्भ्लुशाय। व्याधिनेत्रा
नाम्पतयेनमोनमोभवस्यहेत्त्यैजगताम्पतयेनमोनमोरुद्रायात
तायिनेक्षेत्राणाम्पतयेनमोनमः सूतायाहन्त्येव्वनानाम्पतये
नमोनमोरोहिताय ।।१८।। नमोरोहिताय। स्थपतयेव्वृक्षा
णाम्पतयेनमोनमोभुवन्तयेव्वारिवस्कृतायौषधीनाम्पतये
नमोनमोमन्त्रिणेव्वाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घो
षायाक्क्रन्दयतेपत्तीनाम्पतयेनमोनमः कृत्स्नायतया ।।१९।।
नमः कृत्स्नायतया ।। धावतेसत्त्वनाम्पतयेनमोनमः सहमा
नायनिव्व्याधिनऽआव्याधिनीनाम्पतयेनमोनमोनिषङ्गि
णेककुभायस्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्या
नाम्पतयेनमोनमोव्वञ्चते ।।२०।। नमोव्वञ्चते। परिव्वञ्चते
स्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषुधिमतेतस्क्कराणाम्पतयेनमोनमः सृकायिब्भ्योजिघांसद्भ्योमुष्ण
ताम्पतयेनमोनमोसिमद्भ्योनक्तञ्चरद्भ्योव्विकृन्तानाम्प
तयेनमः ।।२१।। नमऽउष्णीषिणे ।। गिरिचरायकुलु
ञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्न्वायिब्भ्यश्श्चवो
नमोनमऽआतन्न्वानेब्भ्यः प्रतिदधानेब्भ्यश्श्चवोनमो
नमऽआयच्छद्भ्योस्यद्भ्यश्श्चवोनमोनमोव्विसृजद्भ्यः
।।२२।। नमो व्विसृजद्भ्योव्विद्ध्यद्भ्यश्श्चवोनमोनमः
स्वपद्भ्योजाग्ग्रद्भ्यश्श्चवोनमोनमः शयानेब्भ्यऽआसीने

ब्भ्यश्श्चवोनमोनमस्तिष्ठ्ठद्भ्यौधावद्भ्यश्श्चवोनमोनमः
सभाब्भ्यः ।।२३।। नमःसभाब्भ्यः। सभापतिब्भ्यश्श्च
वोनमोनमोश्श्वेब्भ्योश्श्वपतिब्भ्यश्श्चवोनमोनमऽआ
व्याधिनीब्भ्योव्विविद्धयन्तीब्भ्यश्श्चवोनमोनमऽउगणा
ब्भ्यस्तृꣳहतीब्भ्यश्श्चवोनमोनमोगणेब्भ्यः ।।२४।।
नमोगणेब्भ्यो। गणपतिब्भ्यश्श्चवोनमोनमोव्व्रातेब्भ्यो
व्व्रातपतिब्भ्यश्श्चवोनमोनमो गृत्सेभ्योगृत्सपतिब्भ्यश्श्च
वोनमोनमोव्विरूपेब्भ्योव्विश्श्वरूपेब्भ्यश्श्चवोनमोनमꣳ
सेनाब्भ्यꣳ ।।२५।। नमꣳसेनाब्भ्यꣳ। सेनानिब्भ्यश्श्चवो
नमोनमोरथिब्भ्योऽअरथेब्भ्यश्श्चवोनमोनमःक्षत्तृब्भ्यः
सङ्गृहीतृब्भ्यश्श्चवो नमो नमो महद्भ्योऽअर्ब्भकेब्भ्य
श्श्चवोनमः ।।२६।। नमस्तक्षब्भ्यꣳ।। नमस्तक्षब्भ्योरथ
कारेब्भ्यश्श्चवोनमोनमꣳकुलालेब्भ्यꣳकर्मारेब्भ्यश्चवोनमो
नमोनिषादेब्भ्यःपुञ्जिष्ठेब्भ्यश्चवोनमोनमःश्श्वनिब्भ्यो
मृगयुब्भ्यश्चवोनमोनमꣳश्श्वब्भ्यः ।।२७।। नमꣳश्श्वब्भ्यꣳ।
श्श्वपतिब्भ्यश्चवोनमोनमोभवायचरूद्रायचनमःशर्व्वायच
पशुपतयेचनमोनीलग्ग्रीवायचशितिकण्ठायचनमःकपर्द्दिने
।।२८।। नमःकपर्द्दिने। चव्व्युप्तकेशायचनमःसहस्राक्षाय
चशतधन्न्वनेचनमोगिरिशयायचशिपिविष्टायचनमो
मीढृष्ट्टमायचेषुमतेचनमोह्रस्वाय ।।२९।। नमोह्रस्वाय।
चव्वामनायचनमोबृहतेचव्वर्षीयसेचनमोव्वृद्धायचस

वृधेचनमोग्ग्र्यायचप्रथमायचनमऽआशवे ।।३०।। नमऽ
आशवे । चाजिरायचनमꣳशीग्घ्र्यायचशीब्भ्यायचनमऽ
ऊर्म्म्यायचावस्वन्न्यायचनमोनादेयायचद्वीप्प्यायच ।।३१।।
नमोज्ज्येष्ठाय । चकनिष्ठायचनमः पूर्व्वजायचपरजायचनमो
मद्ध्यमायचाप्रगल्भायचनमोजघन्न्यायचबुध्न्यायचनमꣳ
सोब्भ्याय ।।३२।। नमꣳसोब्भ्याय । चप्रतिसर्य्यायचनमो
याम्म्यायचक्षेम्म्यायचनमꣳश्लोक्यायचावसान्न्यायचनमऽ
उर्व्वर्य्यायचखल्ल्यायचनमोव्वन्न्याय ।।३३।। नमोव्वन्न्याय
चकक्ष्यायचनमः श्रवायचप्रतिश्रवायचनमऽआशुषेणाय
चाशुरथायचनमꣳशूरायचावभेदिनेचनमोबिल्म्मिने ।।३४।।
नमोबिल्म्मिने । चकवचिनेचनमोव्वर्म्मिणेचव्वरूथिनेचनमः
श्रुतायचश्रुतसेनायचनमोदुन्दुब्भ्यायचाहनन्न्यायचनमो
धृष्ष्णवे ।।३५।। नमोधृष्ष्णवे । चप्प्रमृशायचनमोनिष
ङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमः स्वायु
धायचसुधन्न्वनेच ।।३६।। नमꣳस्रुत्यायच । पत्थ्यायचनमꣳ
काट्यायचनीप्प्यायचनमꣳकूल्ल्यायचसरस्यायचनमोनादे
यायचव्वैशन्तायचनमꣳकूप्प्याय ।।३७।। नमꣳकूप्प्याय ।
चावट्यायचनमोव्वीद्ध्र्यायचातप्प्यायचनमोमेग्घ्यायचव्विद्यु
त्यायचनमोव्वर्ष्यायचावर्ष्यायचनमोव्वात्याय ।।३८।। नमो
व्वात्याय । चरेष्म्यायचनमोव्वास्तव्व्यायचवास्तुपायचनमꣳ
सोमायचरुद्रायचनमस्ताम्म्रायचारुणायचनमः शङ्गवे ।।३९।।

नमः॑ शङ्गवे॑। चपशुपतये॑चनम॑ऽउग्राय॑चभीमाय॑चनमो॑ग्रेव
धायचदूरेवधायचनमो॑हन्त्रेचहनीयसेचनमो॑वृक्षेभ्योहरि
केशेभ्योनमस्ताराय॑।।४०।। नमः॑ शम्भवाय॑। चमयोभवाय॑
चनमः॑ शङ्कराय॑चमयस्कराय॑चनमः॑ शिवाय॑चशिवतराय च
।।४१।। नमः पार्य्याय॑। चावार्य्यायचनमः॑ प्रतरणाय
चोत्तरणायचनमस्तीर्त्थ्याय॑चकूल्ल्यायचनमः शष्प्याय॑च
फेन्न्यायचनमः॑ सिकत्त्यायनमः॑।।४२।। नमः॑ सिकत्याय।
चप्रवाह्यायचनमः किᳬशिलाय॑चक्षयणायचनमः॑ कपर्द्दिने॑च
पुलस्तये॑चनम॑ऽइरिण्यायचप्रपत्थ्यायचनमो॑व्व्रज्ज्याय
।।४३।। नमो॑व्व्रज्ज्याय। चगोष्ठ्याय॑चनमस्तल्प्प्याय॑चगेह्या
यचनमोहृदय्यायचनिवेष्प्यायचनमः काट्याय॑चगह्वरेष्ठाय
चनमः शुष्क्याय।।४४।। नमः शुष्क्याय। चहरित्यायच
नमः॑ पाᳬसव्व्यायचरजस्यायचनमोलोप्प्यायचोल्लप्प्याय
चनमऽऊर्व्व्याय॑चसूर्व्व्याय॑चनमः पर्णाय॑।।४५।। नमः॑
पर्णाय॑। चपर्णशदाय॑चनमऽउद्गुरमाणायचाभिघ्नेतचनम॑ऽ
आखिदतेच॑प्रखिदतेचनम॑ऽइषुकृद्भ्योधनुष्कृद्भ्य॑श्श्चवो
नमोनमो॑वः किरिकेभ्योदेवानाᳬहृदयेभ्योनमो॑व्विचिन्न्व
त्केभ्योनमो॑व्विक्षिणत्केभ्योनम॑ऽआनिर्हतेभ्यः॑।।४६।।
द्रापेऽअन्धसस्प्पतेदरिद्रनीललोहित।। आसाम्प्रजानामेषा
म्प्पशूनाम्माभेर्म्मारोङ्मोच॑नः किंचनाममत्।।४७।। इमा
रुद्राय। तवसे॑कपर्द्दिने॑क्षयद्वीराय॑प्रभरामहेमतीः।। यथा

शमसद्द्विपदेचतुष्पदेव्विश्श्वम्पुष्टङ्ग्रामे ऽअस्म्मिन्ननातुरम्
।।४८।। यातेरुद्द्रशिवातनूः शिवाव्विश्श्वाहाभेषजी ।।
शिवारुतस्यभेषजीतयानोमृडजीवसे ।।४९।। परिनोरुद्द्रस्य
हेतिव्वृर्णक्तुपरित्त्वेषस्यदुर्म्मतिरघायोः ।। अवस्त्थिराम
घवद्भ्यस्तनुष्ष्वमीढ्वस्तोकायतनयायमृड ।।५०।। मीढुष्टम
शिवतम । शिवोनः सुमनाभव ।। परमेव्वृक्ष ऽआयुधन्त्रि
धायकृत्तिंव्वसान ऽआचरपिनाकम्बिभ्रदागहि ।।५१।।
व्विकिरिद्द्रविलोहितनमस्ते ऽअस्तुभगवः ।। यास्तेसहस्रꣳ
हेतयोन्न्यमस्म्मन्निवपन्तुताः ।।५२।। सहस्राणिसहस्र
शोबाह्वोस्तवहेतयः ।। तासामीशानोभगवः पराचीना
मुखाकृधि ।।५३।। असङ्ख्यातासहस्राणि । येरुद्द्रा ऽ
अधिभूम्याम् ।। तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि
।।५४।। अस्म्मिन्न्महत्त्यर्ण्णवेन्तरिक्षेभवा ऽअधि ।।
तेषाꣳसहस्रयोजनेवधन्न्वानितन्नमसि ।।५५।। नील
ग्ग्रीवाः शितिकण्ठादिवꣳ रुद्द्रा ऽउपश्श्रिताः ।। तेषाꣳसहस्र
योजनेवधन्न्वानितन्न्मसि ।।५६।। नीलग्ग्रीवाःशितिकण्ठाः
शर्व्वाअधः क्षमाचराः ।। तेषाꣳसहस्रयोजनेवधन्न्वा
नितन्न्मसि ।।५७।। येव्वृक्षेषुशष्प्पिञ्जरानीलग्ग्रीवाव्वि
लोहिताः ।। तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ।।५८।।
येभूतानामधिपतयोव्विशिखासः कपर्द्दिनः ।। तेषाꣳ
सहस्रयोजनेवधन्न्वानितन्न्मसि ।।५९।। येपथाम्पथिरक्षय ऽ

ऐलवृदाऽआयुर्ष्युध÷ ।। तेषाँ सहस्रयोजनेवधन्नवानितन्न
मसि ।।६०।। येतीर्त्थानिप्रचरन्तिसृकाहस्तानिषङ्गिण÷ ।।
तेषाँ सहस्रयोजनेवधन्न्वानितन्मसि ।।६१।। येन्नेषु ।
व्विविद्ध्यन्तिपात्रेषुपिबतोजनान् ।। तेषाँ सहस्रयोजने
वधन्न्वानितन्नमसि ।।६२।। यऽएतावन्तश्श्चभूयाँ
सश्श्चदिशोरुद्द्रावितस्त्थिरे ।। तेषाँ सहस्रयोजनेवधन्न्वा
नितन्मसि ।।६३।। नमोस्तु । रुद्द्रेब्भ्योयेदिवियेषांव्वर्ष
मिषव ।। तेब्भ्योदशप्राचीर्द्दशदक्षिणादशप्रतीचीर्द्दशोदी
चीर्दशोद्ध्वर्वा ।। तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृड
यन्तुतेयन्द्विष्मोयश्श्चनोद्द्वेष्टितमेषाञ्जम्भेदध्ध्म ।।६४।।
नमोस्तु रुद्द्रेब्भ्योयेन्तारिक्षेयेषांव्वातऽइषव ।। तेब्भ्यो
दशप्राचीर्द्दशदक्षिणादशप्रतीचीर्द्दशोदीचीर्द्दशोद्ध्वर्वा ।।
तेब्भ्योनमोऽअस्तुतेनोव्वन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोय
श्श्चनोद्द्वेष्टितमेषाञ्जम्भेदध्ध्म ।।६५।। नमोस्तुरुद्द्रे
ब्भ्योयेपृथिव्व्यांय्येषामन्नमिषव । तेब्भ्योदशप्राचीर्द्दश
दक्षिणादशप्रतीचीर्द्दशोदीचीर्द्दशोद्ध्वर्वा । तेब्भ्योनमोऽ
अस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्श्चनोद्द्वेष्टित
मेषाञ्जम्भेदध्ध्म ।।६६।।(शु.य.१६ १ से ६६) नमस्तेरुद्द्रमन्न्यवऽ
उतोतऽइषवेनम÷ ।। बाहुब्भ्यामुततेनम÷ ।।६७।। यातेरुद्द्र
शिवातनूरघोरापापकाशिनी ।। तयानस्तन्न्वाशन्तमयागिरि
शन्ताभिचाकशीहि ।।६८।। यामिषुङ्गिरिशन्तहस्तेबि

भष्ष्र्यस्तवे ।। शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीꣳ पुरुष
ञ्जगत् ।।६९।। शिवेनव्वचसात्त्वागिरिशाच्छाव्वदामसि ।।
यथानꣳ सर्व्वमिज्जगदयक्ष्मꣳ सुमना ऽअसत् ।।७०।।
अद्ध्यवोचदधिवक्ताप्प्रथमोदैव्व्योभिषक् ।। अहींश्श्च
सर्वाञ्जम्भयन्त्सर्व्वांश्श्चयातुधान्न्योधराचीꣳपरासुव ।।७१।।
असौयस्ताम्म्रो ऽअरुण ऽउतबब्भ्रुꣳ सुमङ्गल÷ ।। येचैनꣳ
रुद्द्रा ऽअभितोदिक्षुश्रिताः सहस्स्रशोवैषाꣳहेड ऽईमहे ।।७२।।
असौयो ऽवसर्प्पतिनीलग्ग्रीवोव्विलोहितꣳ ।। उतैनङ्गोपा ऽ
अदृश्श्रन्नदृश्श्रन्नुदहार्य्यꣳ सदृष्ट्टोमृडयातिनꣳ ।।७३।।
नमो ऽस्तुनीलग्ग्रीवायसहस्स्राक्षायमीढुषे ।। अथोये ऽअस्य
सत्वानोहन्तेब्भ्योकरन्नम÷ ।।७४।। प्रमुञ्चधन्न्वनस्त्वमु
भयोरात्न्योज्ज्याम् ।। याश्श्चतेहस्त ऽइषवꣳ पराता
भगवोव्वप ।।७५।। विज्ज्यन्धनु÷कपर्द्दिनोव्विशल्ल्यो
बाणवाँ२ ऽउत ।। अनेशन्नस्यया ऽइषव ऽआभुरस्य
निषङ्गधि? ।।७६।। याते । हेतिम्मीढुष्टम ऽहस्तेबभूवते
धनु÷ । तयास्म्मान्न्विश्श्वतस्त्वमयक्ष्म्मयापरिभुज ।।७७।।
परितेधन्न्वनोहेतिरस्म्मान्न्वृणक्तुविश्श्वत÷ ।। अथोय ऽइषु
धिस्तवारे ऽअस्म्मन्निधेहितम् ।।७८।। अवतत्त्यधनुष्ट्वꣳ
सहस्स्राक्षशतेषुधे ।। निशीर्य्यशल्ल्यानाम्मुखाशिवोन÷
सुमनाभव ।।७९।। नमस्त ऽआयुधायानाततायधृष्ष्णवे ।।
उभाब्भ्यामुततेनमोबाहुब्भ्यान्तवधन्न्वने ।।८०।। मानो

महान्तमुतमानोऽअर्ब्भकम्मान ऽउक्षन्तमुतमान ऽउक्षितम् ।।
मानोव्वधीः पितरम्मोतमातरम्मान ÷ प्प्रियास्तन्न्वोरुद्द्र री
रिषः ।।८१।। मानस्तोके । तनयेमान ऽआयुषिमानोगोषु
मानो ऽअश्श्वेषुरीरिषः ।। मानोव्वीरान्रुद्द्रभामिनोव्वधीर्ह
विष्मन्तः सदमित्त्वाहवामहे ।।८२।। (शु.य.१६ / १ से १६) ॐ एषते ।
रुद्द्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्द्रभाग
आखुस्तेपशुः ।।८३।। अवरुद्द्रमदीमह्यवदेवन्त्र्यम्बकम् ।।
यथानोव्वस्यसस्क्करद्यथानः श्श्रेयसस्क्करद्यथानोव्व्यवसाय
यात् ।।८४।। (शु.य.३ / ५७,५८) नमस्तेरुद्द्रमन्न्यव ऽउतोत ऽइषवेनमः ।।
बाहु ब्भ्यामुततेनमः ।।८५।। १६/१ यातेरुद्द्रशिवातनूरघोरा
पापकाशिनी ।। तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाक
शीहि ।।८६।। १६/२ नतंव्विदाथय ऽइमाजजानान्यद्युष्म्माक
मन्तरम्बभूव । नीहारेणप्रावृताजल्प्याचासुतृप ऽउक्थशा
सश्चरन्ति ।।८७।। व्विश्श्वकर्माह्यजनिष्टदेव ऽआदिद्गन्ध
र्व्वोऽअभवद्द्वितीयः । तृतीयः पिताजनितौषधीनामपाङ्गर्ब्भं
व्व्यदधात्पुरुत्रा ।।८८।। १७/३१,३२ मीढुष्टमशिवतम । शिवोनः
सुमनाभव ।। परमेव्वृक्ष ऽआयुधन्निधायकृत्तिंव्वसान ऽ
आचरपिनाकम्बिभ्रदागहि ।।८९।। व्विकिरिद्द्रविलोहित
नमस्ते ऽअस्तुभगवः ।। यास्तेसहस्रः हेतयोन्न्यमस्म्मन्निव
पन्तुताः ।।९०।। सहस्राणिसहस्रशोबाह्वोस्तवहेतयः ।।
तासामीशानोभगवः पराचीनामुखाकृधि ।।९१।। असङ्ख्या

तासहस्राणि । येरुद्रा ऽअधिभूम्याम् ।। तेषां सहस्रयोजने
वधन्वानितन्मसि ।।६२ ।। (शु.य.१६ ५१ से ५४) व्वय सोमव्रतेतव
मनस्तनूषुबिभ्रत ।। प्रजावन्त सचेमहि ।।६३ ।। एषते ।
रुद्रभाग सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभाग ऽ
आखुस्तेपशु ।।६४ ।। अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् ।।
यथानोव्वस्यसस्करद्यथान श्रेयसस्करद्यथानोव्यव
साययात् ।।६५ ।। भेषजमसि भेषजङ्गवेश्वायपुरुषाय
भेषजम् ।। सुखम्मेषायमेष्यै ।।६६ ।। त्र्यम्बकंय्यजामहे
सुगन्धिम्पुष्टिवर्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय
मामृतात् ।। त्र्यम्बकंय्यजामहेसुगन्धिम्पतिवेदनम् ।। उर्वारु
कमिवबन्धनादितोमुक्षीयमामुत ।।६७ ।। एतत्ते । रुद्रा
व्वसन्तेनपरोमूजवतोतीहि ।। अवततधन्वापिनाकाव्वस
कृत्तिवासा ऽअहि सन्न शिवोतीहि ।।६८ ।। त्र्यायुषञ्ज
मदग्ने कश्यपस्स्यत्र्यायुषम् ।। यद्देवेषुत्र्यायुषन्तन्नों ऽ
अस्तुत्र्यायुषम् ।।६९ ।। शिवोनामासिस्वधितिस्तेपिता
नमस्ते ऽअस्तुमामाहि सी ।। निर्वर्त्तयाम्म्यायुषेन्नाद्याय
प्प्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्य्याय ।।१०० ।। (शु.य.३ ५६ से ६३)

।। उत्तर न्यासान्विधाय ।।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनो।
त्वरिष्टंय्यज्ञ समिमन्दधातुव्विश्वेदेवास ऽइहमादयन्तामो३
म्प्रतिष्ठ ।। ॐ हृदयायनमः ।

ॐ अबोध्यग्निः समिधाजनानाम्प्रतिधेनुमिवायती मुषासम्। यह्वा ऽइवप्रवयामुज्जिहाना ᳪ प्रभानवः सिस्रते नाकमच्छ।। ॐ शिरसे स्वाहा।

ॐ मूर्द्धानन्दिवो ऽअरतिम्पृथिव्यावैश्वानरमृत ऽआजातमग्निम्। कविᳯ सम्म्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्तदेवाः। ॐ शिखायै वषट्।।

ॐ मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वाराजामृते नानुवस्ताम्। उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानु देवामदन्तु।। ॐ कवचायहुम्।।

ॐ व्विश्श्वतश्चक्षुरुतव्विश्श्वतोमुखोव्विश्श्वतोबाहुरुत व्विश्श्वतस्पात्। सम्बाहुब्भ्यान्धमतिसम्पतत्रैर्द्यावाभूमीज नयन्देव ऽएकः।। ॐ नेत्रत्रयायवौषट्।।

ॐ मानस्तोकेतनयेमान ऽआयुषिमानोगोषुमानो ऽअश्श्वेषुरीरिषः।। मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे। ॐ अस्त्रायफट्।

ॐ वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्।
वन्दे सूर्यशशांकवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम्।।

ॐ नमः पार्वतीपतये हर हर हर।।

श्री शिवमहिम्नः स्तोत्रम्

पुष्पदन्त उवाच

महिम्नः पारन्ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः।।१।।

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्यायं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः।।२।।

मधुस्फीता वाचः परमममृतं निर्मितवत-
स्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम्।
मम त्वेतां वाणीं गुणकथन पुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता।।३।।

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तुव्यस्तं तिसृषु गुणाभिन्नासुतनुषु।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः।।४।।

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च।

अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽय कांश्चिन्मुखरयति मोहाय जगतः।।५।।

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे।।६।।

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।७।।

महोक्षः ख़ट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणाम्।
सुरास्तां तामृद्धिं विदधति भवद्भ्रूप्रणिहितां
नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति।।८।।

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये।
समस्तेऽप्येतस्मिन्पुरमथनतैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता।।९।।

तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः
परिच्छेत्तुं यातावनलमनिलस्कन्धवपुषः।

ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति।।१०।।

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्।
शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम्।।११।।

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेऽपि त्वदधिवसतो विक्रमयतः।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः।।१२।।

यदृद्धिं सुत्राम्णो वरद! परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो
र्नकस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः।।१३।।

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्याऽसीद् यस्त्रिनयनविषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः।।१४।।

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।

स पश्यन्नीश त्वामितरसुरसाधारणमभूत
स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः।।१५।।

मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता।।१६।।

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते।
जगद्द्वीपाकारं जलधिवलयंतेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः।।१७।।

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्को रथचरणपाणिः शर इति।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिः
विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः।।१८।।

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम्।।१९।।

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते।

अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढ़परिकरः कर्मसुजनः।।२०।।

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः।।२१।।

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तंतेऽद्यापि त्यजति न मृगव्याधरभसः।।२२।।

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन! पुष्पायुधमपि।
यदिस्त्रैणं देवी यमनिरतदेहार्धघटन-
दवैति त्वामद्धा बत वरद! मुग्धा युवतयः।।२३।।

श्मशानेष्वाक्रीड़ा स्मरहर! पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तॄणां वरद परमं मङ्गलमसि।।२४।।

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः।

यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्वं किमपि यमिनस्तत्किल भवान्।।२५।।

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योमस्त्वमु धरणिरात्मा त्वमितिच।
परिच्छिन्नामेवं त्वयि परिणता विभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि।।२६।।

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमयो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृतिः।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमितिपदम्।।२७।।

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।
अमुष्मिन्प्रत्येकं प्रविचरति देवः श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते।।२८।।

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमितिशर्वाय च नमः।।२९।।

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः।

जनसुखकृते सत्त्वोद्रिक्तो मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः।।३०।।

कृशपरिणतिचेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः।
इति चकितममन्दीकृत्य मां भक्तिराधा-
द्वरद चरणयोस्ते वाक्यपुष्पोपहारम्।।३१।।

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमूर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति।।३२।।

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य।
सकलगुणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमरुलघवृत्तैः स्तोत्रमेतच्चकार।।३३।।

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्तया शुद्धचित्तः पुमान् यः।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च।।३४।।

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम्।।३५।।

आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम्।
अनूपमं मनोहारि शिवमीश्वरवर्णनम्।।३६।।

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम्।।३७।।

कुसुमदशननामा सर्वगन्धर्वराजः
शशिधरवरमौलेर्देवदेवस्य दासः।
स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षी द्दिब्यदिब्यं महिम्नः।।३८।।

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम्।।३९।।

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः।।४०।।

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः।।४१।।

।। इति श्री पुष्पदन्तप्रणीत श्री शिवमहिम्नः स्तोत्रं समाप्तम्।।

।। ॐ साम्बसदाशिवाय नमः।।

अथ शिवताण्डवस्तोत्र प्रारम्भः

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलम्ब्य लम्बितां भुजगंतुगंमालिकाम्।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं
चकार चण्डताण्डवं तनोतु नः शिवः शिवम्।।१।।
जटाकटाहसंभ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरी विराजमानमूर्द्धनि।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम।।२।।
धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुर
स्फुरद्दृगन्तसन्ततिप्रमोदमानमानसे।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि।।३।।
जटाभुजंगपिगंलस्फुरत्फणामणिप्रभा-
कदम्बकुंकुमद्रवप्रलिप्तदिग्वधूमुखे।
मदान्धसिन्धुरासुरत्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि।।४।।
ललाटचत्वरज्वलद्धनञ्जयस्फुलिंगया
निपीतपंचसायकं नमन्निलिम्पनायकम्।
सुधामयूखरेखया विराजमानशेखरं
महः कपालि संपदे सरिज्जटालमस्तु नः।।५।।
सहस्रलोचनप्रभृत्यशेषलेखशेखर-
प्रसूनधूलिधोरणीविधूसरांघ्रिपीठभूः।

भुजंगराजमालया निबद्ध जाटजूटकः
श्रिये चिराय जायतां चकोरबन्धुशेखरः ।।६ ।।
करालभालपट्टिकाधगद्धगद्धगज्ज्वल-
द्धनंजयाहुतीकृतप्रचण्डपन्चसायके ।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक-
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ।।७ ।।
नवीनमेघमण्डलीनिरूद्धदुर्धरस्फुरत्
कुहूनिशीथिनीतमः प्रबन्धबद्धकन्धरः ।।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसुन्दरः
कलानिधानबन्धुरः श्रियं जगद्धुरन्धुरः ।।८ ।।
प्रफुल्लनीलपकंजप्रपन्चकालिमप्रभा-
बलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ।।९ ।।
अखर्वसर्वमंगलाकलाकदम्बमन्जरी-
रसप्रवाहमाधुरीविजृम्भणीमधुव्रतम् ।
स्मरान्तकंपुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ।।१० ।।
जयत्यदभ्रविभ्रमभ्रमद्धुजंगमश्वसद्
विनिर्गमक्रमस्फुरत्करालभालहव्यवाट् ।
धिमिंधिमिंधिमिध्वनन्मृदंगतुंगमंगल-
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः ।।११ ।।
दृषद्विचित्रतल्पयोर्भुजंगमौक्तिकस्रजो-
र्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्ष पक्षयोः

तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समप्रवृत्तिकः कदा सदाशिवं भजाम्यहम् ।।१२।।
कदा निलिम्पनिर्झरीनिकुंजकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरस्थमंजलिं वहन् ।
विलोललोललोचनाललामभाललग्नकं
शिवेति मन्त्रमुच्चरन्सदा सुखी भवाम्यहम् ।।१३।।
निलिम्पनाथनागरीकदम्बमौलिमल्लिका-
निगुम्फनिर्भरक्षरन्मधूष्णिकामनोहरः ।
तनोतु नो मनोमुदं विनोदिनीमहर्निशं
परश्रियः परं पदं तदंगजत्विषां चयः ।।१४।।
प्रचण्डवाडवानलप्रभाशुभप्रचारिणी
महाष्टसिद्धिकामिनीजनावहूतजल्पना ।
विमुक्तवामलोचनाविवाहकालिकध्वनिः
शिवेति मन्त्रभूषणं जगज्जयाय जायताम् ।।१५।।
इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन् स्मरन् ब्रुवन् नरो विशुद्धिमेति सन्ततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां सुशंकरस्य चिन्तनम् ।।१६।।
पूजावसानसमये दशवक्त्रगीतं
यः शम्भुपूजनमिदं पठति प्रदोषे ।।
तस्य स्थिरां रथगजेन्द्रतुरंगयुक्तां
लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः ।।१७।।

।। इति रावणकृत शिवताण्डवस्तोत्रं सम्पूर्णम् ।।

।। ॐ साम्बसदाशिवाय नमः ।।

पार्वतीलास्यम्

(आचार्य बृहस्पति विरचितम्)

शशाङ्क शेखरज्ज्वलस्मितांशुमालिकालसद्
विनोदमोद सिन्धुमज्जनोत्सुकाऽपराजिता।
मदालसाङ्ग भङ्गिमाऽङ्गनाविलासदेशिका
महेश मोहिनी महेश्वरी जयेदमंगलम्।।१।।

लसल्लटिका विलोल मौक्तिकालि शोभना
लयोर्मिलालिताङ्गहार मालिका मनोहरा।
दिगन्नगिन्दिगिन्नन्दिगिन्न गिन्निति ध्वज-
न्मृदङ्ग सङ्गिनी सनोतु पार्वती सदा शिवम्।।२।।

हिरण्यमयील्लसत् किरीटिनी सुवर्णवर्णिनी
मणिप्रभामयूखजाल लालिताङ्ग दीपिनी।
चलत्का स्थ काञ्चिदामिनी द्युति प्रवर्षिणी
सुहासिनी गिरीश नन्दिनी करोतु मंगलम्।।३।।

अनङ्ग सङ्गिनी मनस्तरङ्ग भङ्गि नन्दिता-
ङ्गहार कल्पनाकलाप कौशलान्विता।
रुनुञ्झुनुन् रुनुञ्झुनुन् रुनुञ्झुनुन् नादिनी
शिवाविमुक्तताण्डवं शिवञ्चिरायु पश्यतु।।४।।

सितस्मिताधरप्रवाल निन्दितेन्दु लेखया
विमुक्त बेणिसर्पिणी हताहि मण्डल श्रिया।

शुभाङ्ग भङ्गिनिर्जितौ तरङ्गजाह्नवीत्विषा
प्रमाद्यतामहर्निशं शिवः प्रसन्नयो मया।।५।।

चलत्पदाम्बुजार्पिते रलक्तकाङ्कितैः परा
म्प्रफुल्लपङ्कजच्छविं समर्प्यदर्पण प्रभम्।
हिमावृतावनीत लङ्कटिस्थ किङ्किणी क्वण
प्रवीणया विनोद्यताममन्दमिन्दु शेखरः।।६।।

महेश मौलि मल्लिका मिलन्मिलिन्द गुञ्जित
म्प्रकल्प्य मध्यमस्वरं सुमध्यमाभि रैशकम्।
प्रगीयमानमालिभिः प्रबन्धमङ्गभङ्गिभिः
र्व्यनक्तु शैलजा मनोजवैरिणोऽनिशंमुदे।।७।।

अपाङ्ग मङ्गिमेङ्गिता भिषङ्म्हर्षितो हरः
पदारविन्द नूपुर क्वणेन मन्द हासया।
सलीलमालिवृन्दवन्दनोल्लसद्विलासया
निमन्त्र्यतामनङ्गगर्वभञ्जकोऽनुवृत्तये।।८।।

पुराविशाल बाहुदण्ड मण्डनैभुजङ्गभै
र्मृदङ्गवेणुवल्लकी निनाद मैहितैस्ततः।
श्लघाङ्गबन्धनच्युतैरचञ्चलैश्शनैश्शनैः
सरद्भिरन्तरान्तरा विरम्यतामितस्ततः।।९।।

मदोल्लसन्महेश मानसोर्मिजालमीलितम्
महानलस्फुलिङ्गवर्जितं ललाट लोचनम्।

जटाभुजङ्गराजये शिरः स्वजह्नु सूनवे
निरन्तरं सुखावहं सखी जनाय जायताम्।।१०।।
उमापद क्रमोल्लसन्मना मानगधीश्वरो
हिलन् स्फुरैश्चलन्मिलन् हसन्ध्वनन्समन्ततः।
सखीजनोतवीणितो विनोद भाजनं शिवो
हिमाद्रिजा मृणालबाहुवेष्टितो विलोक्यताम्।।११।।
हिलत्सुवर्ष कुण्डलोल्लसत्कपोल दर्पणा
लुठद्विलोल मौक्तिका वलील सत्पयोधरा।
झनञ्झनञ्झनञ्झनेति कास्य तालक-
स्वनानुवर्तिनी गिरीन्द्रजाश्रयेत्फणीन्द्रिणम्।।१२।।

।। शमिति ।।

कर्पूरार्तिः

इसके बाद कपूर अथवा दीपक (एक या अनेक) द्वारा आरती करें तथा इन मंत्रों को पढ़ें -

ॐ आरात्रिपार्थिवꣳ रज॑ꣳपितुरप्रायि धामभिः।। दिवꣳसदाꣳसिबृहतीव्वितिष्ठस ऽआत्वेषंवर्त्ततितमः।। ॐ इदꣳ हविꣳप्प्रजननम्मे ऽअस्तुदशवीरꣳ सर्वगणꣳस्वस्तये। आत्मसनिप्प्रजासनीपशुसनिलोकसन्न्यभयसनि। अग्निꣳप्रजाम्बहुलाम्मेकरोत्वन्नम्पयोरेतोऽअस्मासुधत्त।।

जय गंगाधर आरती

जयगंगाधर हर शिव जय गिरजाधीशा ।। शिव जय० ।।
त्वं मां पालय नित्यं कृपया जगदीशा ।। ॐ हर हर हर महादेव ।।१।।

कैलासे गिरि शिखरे कल्पद्रुम विपिने ।। शिव० ।।
गुंजति मधुकर पुंजे कुंज वने गहने ।। ॐ हर० ।।२।।

कोकिल कूजति खेलति हंसावलि ललितां ।। शिव० ।।
रचयति कला कलापं नृत्यति मुद सहिता ।। ॐ हर० ।।३।।

तस्मिल्ललित सुदेशे शालामणि रचिता ।। शिव० ।।
तन्मध्ये हर निकटे गौरी मुद सहिता ।। ॐ हर० ।।४।।

क्रीडां रचयति भूषां रंजित निजमीशं ।। शिव० ।।
ब्रह्मादिक सुरसेवित प्रणमति ते शीर्षं ।। ॐ हर० ।।५।।

विबुधवधूबहुनृत्यति हृदये मुद सहिता ।। शिव० ।।
किन्नरगानं कुरुते सप्तस्वर सहिता ।। ॐ हर० ।।६।।

धिनकत थै थै धिनकत मृदंगं वादयते ।। शिव० ।।
क्वण क्वण ललिता वेणुं मधुरं नादयते ।। ॐ हर० ।।७।।

रुण रुण चरणे रचयति नुपरमुज्वलिता ।। शिव० ।।
चक्रावर्ते भ्रमयति कुरुते तां धिक तां ।। ॐ हर० ।।८।।

तां तां लुप चुप तालं मधुरं नादयते ।। शिव० ।।
अंगुष्ठांगुलि नादं लास्यकतां कुरुते ।। ॐ हर० ।।९।।

कर्पूरद्युति गौरं पंचानन सहितम् ।। शिव० ।।
त्रिनयन शशधर मौले विषधर कण्ठयुतम् ।। ॐ हर० ।।१०।।

सुन्दर जटाकलापं पावक युत भालं ।। शिव० ।।
डमरू त्रिशूलपिनाकं कर धृत नृकपालम् ।। ॐ हर० ।।११।।

शंख निनादं कृत्वा झल्लरि नादयते।। शिव०।।
नीराजयते ब्रह्मा वेद ऋचां पठते।। ॐ हर०।।१२।।

इति मृदुचरण सरोजे हृति कमले धृत्वा।। शिव०।।
अवलोकयति महेशं ईशं अभिनत्वा।। ॐ हर०।।१३।।

मुण्डरचित उर माला पन्नग उपवीतम्।। शिव०।।
वाम विभागे गिरजा रूपं अति ललितम्।। ॐ हर०।।१४।।

सकल शरीरे मनसिज कृत भस्माभरणम्।। शिव०।।
इति वृषभध्वजरूपे तापत्रय हरणम्।। ॐ हर०।।१५।।

ध्यानं आरति समये हृदये इति कृत्वा।। शिव०।।
रामं त्रिजटानाथं ईशं अभिनत्वा।। ॐ हर०।।१६।।

आरतिमेवं प्रतिदिन पठनं यः कुरुते।। शिव०।।
शिव सायुज्यं गच्छति भक्त्या या श्रृणुते।। ॐ हर०।।१७।।

।। ॐ नमः शिवाय।।

आरती

ॐ जय शिव ओंकारा, हर जय शिव ओंकारा,
ब्रह्मा विष्णु सदाशिव, अर्द्धांगी धारा।। ॐ हर हर हर महादेव।।

एकानन चतुरानन, पंचानन राजे।। शिव पंचानन०।।
हंसासन गरुड़ासन, वृषवाहन राजै।। ॐ हर हर हर महादेव।।

दोयभुज चार चतुर्भुज, दशभुज ते सोहै।। शिव दश०।।
तीनों रूप निरखता, त्रिभुवन जन मोहै।। ॐ हर हर हर महादेव।।

अक्षमाला वनमाला, मुण्डमाला धारी।। शिव मुण्ड०।।
चन्दन मृगमद चन्दा भाले शुभकारी।। ॐ हर हर हर महादेव।।

नन्दीवाहन खग वाहन शिव चक्रत्रिशूलधारी।। शिव चक्र०।।
त्रिपुरारी शुभकारी कर कमलाधारी।। ॐ हर हर हर महादेव।।

श्वेताम्बर पीताम्बर बाघाम्बर अंगे।। शिव बाघा०।।
ब्रह्मादिक सनकादिक भूतादिक संगे।। ॐ हर हर हर महादेव।।

लक्ष्मीवर सावित्री गंगा पारवती संगे।। शिव पार०।।
बाघाम्बर आसन पर उमया अर्धंगे।। ॐ हर हर हर महादेव।।

करमध्ये सुकमण्डलु चक्र त्रिशूल धर्ता।। शिव चक्र०।।
जगकर्ता जगभर्ता जन पालन कर्ता।। ॐ हर हर हर महादेव।।

ब्रह्मा विष्णु सदा शिव जानत अविवेका।। शिव जानत०।।
प्रणवाक्षर सनुमध्ये ये तीनों एका।। ॐ हर हर हर महादेव।।

काशी में विश्वनाथ विराजे नन्दी ब्रह्मचारी।। शिव नन्दी०।।
नित उठि दरसन पावत महिमा अति भारी।। ॐ हर हर हर महादेव।।

साम्ब सदाशिव की आरती जो कोई नर गावै।। शिव जो०।।
कहत शिवानन्द स्वामी, इच्छा फल पावै।। ॐ हर हर हर महादेव।।

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारं।
सदावसन्तं हृदयारविन्दे भवं भवानी सहितं नमामी।।

कदलीगर्भ संभूतं कर्पूरेण प्रदीपितम्।
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव।।

इसके बाद आरती जल द्वारा शीतल करें। सभी भक्तजन आरती लें। हाथ धोकर भगवान को प्रणाम करें। हाथ में पुष्प-बिल्वपत्र आदि लेकर पुष्पांजलि करें।

पुष्पाञ्जलि

ॐ यज्ञेनयज्ञमयजयन्तदेवास्तानिधर्म्माणि प्रथमान्न्यासन्।। तेहनाकम्महिमानः सचन्त यत्रपूर्व्वेसाद्ध्याः सन्तिदेवाः।।१।। ३१/१६

ॐ व्विश्श्वतश्चक्षुरुतव्विश्श्वतोमुखो व्विश्श्वतोबाहुरुतव्विश्श्वतस्प्पात् ।। सम्बाहुब्भ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देव ऽ एकः ।।२।। $\frac{१७}{१६}$

ॐ तत्पुरुषायविद्महेमहादेवायधीमहि । तन्नोरुद्रःप्रचोदयात् ।।३।।

ॐ राजाधिराजाय प्रसह्य साहिने। नमो वयं वैश्रवणाय्ग कुर्महे। स मे कामान् कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु। कुबेराय वैश्रवणाय। महाराजाय नमः।

ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्, सार्वभौमः सार्वायुष आन्तादापरार्धात्, पृथिव्यै समुद्रपर्यंताया एकराडिति ।।

तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे। आवीक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ।।

ॐ मानस्तोकेतनयेमान ऽआयुषिमानो गोषुमानोऽअश्श्वेषुरीरिष ं। मानोव्वीरान्रुद्र

भाभिनोव्वधीर्हविष्म्मन्त ँ सदमित्त्वा हवामहे ।। १६/१६

सेवन्तिकाबकुलचम्पकपाटलाब्जैः पुन्नागजातिकर वीररसाल पुष्पैः।
विल्व प्रवाल तुलसीदल मंजरीभिः त्वां पूजयामि विश्वेश्वर मे प्रसीद ।।

मंत्र पुष्पाञ्जलिं समर्पयामि

इसके बाद अपने स्थान पर खड़े होकर एक प्रदक्षिणा करें।

ॐ येतीर्थानिप्प्रचरन्तिसृकाहस्ता निषङ्गिगणः। तेषां ँ सहस्त्रयोजनेव धन्न्वानितन्न्मसि ।। १६/६१

ॐ सप्तास्यासन्न्परिधयस्त्रि ँ सप्त समिधः कृताः ।। देवायद्यज्ञन्तन्न्वानाऽ अबध्नन्न्पुरुषम्पशुम् ।। ३१/१५

इसके बाद आसन पर बैठकर शिवादि सभी देवताओं का उत्तर पूजन करें।

ॐ नमः शम्भवाय। चमयोभवायच नमः शङ्करायचमयस्क्करायचनमः शिवायचशिवतरायच ।। १६/४१

गन्धाक्षतपुष्पधूपदीपनैवेद्यं निवेदयामि

इसके बाद सब शान्त होकर भगवान शंकर के स्तोत्र का श्रद्धा से पाठ करें।

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं,
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।
संचारः पदयोः प्रदक्षिणाविधिः स्तोत्राणि सर्वागिरो,
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्।।१।।

करचरणकतं वाक्कायजं कर्मजं वा,
श्रवणनयनजं वा मानसं वापराधम्।
विहितमविहितं वा सर्वमेतत्क्षमस्व,
जय जय करूणाब्धे श्रीमहादेव शम्भो।।२।।

इसके बाद सदाशिव की प्रसन्नता के लिए एक **वृषभ दान** की दक्षिणा का संकल्प करें। सपत्नीक दाहिने हाथ में जलाक्षत, पुष्प, पूगीफल, दक्षिणा रखकर आगे लिखा संकल्प बोलें :-

ॐ विष्णु-३ अमुक गोत्राः शर्माहं भवानी शंकर देवता प्रीत्यर्थं कृतैदत् रुद्राभिषेक कर्माणि न्यूनारिक्त दोष परिहारार्थं सांगोपांग फलावाप्तये मनसः कल्पित वृषभ दान निष्क्रिय भूतं रजतं चन्द्र दैवतं द्रव्यं सदा शिवार्पणमस्तु।

कायेन वाचा मन्सेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत्।।

इसके बाद आचार्य एवं पाठकर्ता द्विजजनों को संकल्पपूर्वक दक्षिणा दान करें। अनुष्ठान पूर्ति हेतु सभी ब्राह्मणों को स्वर्णदान एवं भूयसी दक्षिणा का दान करना चाहिए।

इसके उपरान्त ४ अविधुर ब्राह्मण एवं यजमान एवं उपस्थित जन समुदाय का अभिषेक करें।

व्वसो ꣳ पवित्रमसिशतधारम्व्वसो ꣳ पवित्रमसिसहस्त्रधारम्।।
देवस्त्वासवितापुनातुव्वसो ꣳपवित्रेणशतधारेणसुप्वाकामधुक्ष ꣳ।।

इस मंत्र सबको तिलक आशीर्वाद रक्षा बन्धन आदि करें। रत्न लिंग नमर्देश्वर पार्थिवेश्वर ज्योतिर्लिंग का चढ़ा हुआ निर्माल्य ग्रहण कर सकते हैं। यदि किसी शिवाले में अभिषेक हो रहा हो तो वहाँ चण्ड का वास होने से प्रसाद ग्रहण करना निषेध है।

हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्।।
शिवः पशुपतिश्चैव महादेव विसर्जनम्।।

शिवाऽष्टोत्तरशतनामस्तोत्रम् (१)

देवा ऊचुः

जय शम्भो विभो रुद्र स्वयम्भो जय शंकर।।
जयेश्वर जयेशान जय सर्वज्ञ कामद! ।।१।।

नीलकण्ठ जय श्रीद श्रीकंठ जय धूर्जटे! ।
अष्टमूर्तेऽनन्तमूर्ते महामूर्ते जयानघ! ।।२।।

जय पापहरानङ्ग - निःसङ्गाभङ्ग - नाशन! ।
जय त्वं त्रिदशाधार त्रिलोकेश त्रिलोचन! ।।३।।

जय त्वं त्रिपथाधार त्रिमार्ग त्रिभिरूर्जित! ।
त्रिपुरारे त्रिधामूर्ते जयैक-त्रिजटात्मक! ।।४।।

शशिशेखर शूलेश पशुपाल शिवाप्रिय! ।
शिवात्मक शिव श्रीद सुहृच्छ्रीशतनो जय! ।।५।।

सर्व सर्वेश भूतेश गिरीश त्वं गिरीश्वर! ।
जयोग्ररूप भीमेश भव भर्ग जय प्रभो! ।।६।।

जय दक्षाऽध्वर - ध्वंसिन्नन्धक - ध्वंसकारक! ।
रुण्डमालिन् कपालिंस्त्वं भुजङ्गनिजभूषण! ।।७।।

दिगम्बर दिशांनाथ व्योमकेश चितांपते! ।
जयाधार निराधार भस्माधार धराधर! ।।८।।

देवदेव महादेव देवतेशादिदैवत ।
बह्विवीर्य जय स्थाणो जयायोनिजसम्भव ।।९।।

भव शर्व महाकाल भस्माङ्ग सर्पभूषण ।
त्र्यम्बकस्थपते वाचांपते भो जगतांपते ।।१०।।

शिपिविष्ट विरूपाक्ष जय लिङ्ग वृषध्वज ।

नीललोहित पिङ्गाक्ष जय खट्वाङ्गमण्डन ।।११।।

कृत्तिवास अहिर्बुध्न्य मृडानीश जटाम्बुभृत् ।
जगद्भ्रातर्जगन्मातर्जगत्तात जगद्गुरो ।।१२।।

पञ्चवक्त्र महावक्त्र कालवक्त्र गजास्यभृत् ।
दशबाहो महाबाहो महावीर्य महाबल् ।।१३।।

अघोरघोरवक्त्र त्वं सद्योजात उमापते ।
सदानन्द महानन्द नन्दमूर्ते जयेश्वर ।।१४।।

एवमष्टोत्तरशतं नाम्नां देवकृतं तु ये ।
शम्भोर्भक्त्या स्मरन्तीह श्रृणवन्ति च पठन्ति च ।।१५।।

न तापास्त्रिविधास्तेषां न शोको न रुजादयः ।
ग्रहगोचरपीडा च तेषां क्वाऽपि न विद्यते ।।१६।।

श्रीः प्रज्ञा-ऽऽरोग्यमायुष्यं सौभाग्यं भाग्यमुन्नतिम् ।
विद्यां धर्मं मतिः शम्भोर्भक्तिस्तेषां न संशयः ।।१७।।

इति श्रीस्कन्दपुराणे शिवाष्टोत्तरशतनामस्तात्रं सम्पूर्णम् ।।

हिमालयकृतं शिवस्तोत्रम्(२)

हिमालय उवाच

त्वं ब्रह्मा सृष्टिकर्ता च त्वं विष्णुः परिपालकः ।
त्वं शिवः शिवदोऽनन्तः सर्वसंहारकारकः ।।१।।

त्वमीश्वरो गुणातीतो ज्योतीरूपः सनातनः ।
प्रकृतिः प्रकृतीशश्च प्राकृतः प्रकृतेः परः ।।२।।

नानारूपविधाता त्वं भक्तानां ध्यानहेतवे ।
येषु रूपेषु यत्प्रीतिस्तत्तद्रूपं बिभर्षि च ।।३।।

सूर्यस्त्वं सृष्टिजनक आधारः सर्वतेजसाम् ।
सोमस्त्वं सस्यपाता च सततं शीतरश्मिना ।।४।।

वायुस्त्वं वरुणस्त्वं च विद्वांश्च विदुषां गुरुः ।
मृत्युञ्जयो मृत्युमृत्युः कालकालो यमान्तकः ।।५।।

वेदस्त्वं वेदकर्ता च वेदवेदाङ्गपारगः ।
विदुषां जनकस्त्वं च विद्वांश्च विदुषां गुरुः ।।६।।

मन्त्रस्त्वं हि जपस्त्वं हि तपस्त्वं सत्फलप्रदः ।
वाक् त्वं रागाधिदेवी त्वं तत्कर्ता तद्गुरूः स्वयम् ।।७।।

अहो सरस्वतीबीजं कस्त्वां स्तोतुमिहेश्वरः ।
इत्येवमुक्त्वा शैलेन्द्रस्तस्थौ धृत्वा पादाम्बुजम् ।।८।।

तत्रोवास तमाबोध्य चावरुह्य वृषाच्छिवः ।
स्तोत्रमेतन्महापुण्यं त्रिसन्ध्यं यः पठेन्नरः ।।९।।

मुच्यते सर्वपापेभ्यो भयेभ्यश्च भवार्णवे ।
अपुत्रो लभते पुत्रं मासमेकं पठेद्यदि ।।१०।।

भार्याहीनो लभेद् भार्या सुशीलां सुमनोहराम् ।
चिरकालगतं वस्तु लभते सहसा ध्रुवम् ।।११।।

राज्यभ्रष्टो लभेद्राज्यं शंकरस्य प्रसादतः ।
कारागारे श्मशाने च शत्रुग्रस्तेऽतिसंकटे ।।१२।।

गम्भीरेऽतिजलाकीर्णे भग्नपोते विषादने ।
रणमध्ये महाभीते हिंस्रजन्तुसमन्विते ।
सर्वतो मुच्यते स्तुत्वा शंकरस्य प्रसादतः ।।१३।।

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे हिमालयकृतं शिवस्तोत्रं सम्पूर्णम्।

श्री शिव अष्टोत्तरशत नामावलि

१. श्री शिवाय नमः।
२. श्री महेश्वराय नमः।
३. श्री शम्भवे नमः।
४. श्री पिनाकिने नमः।
५. श्री शशि शेखराय नमः।
६. श्री वामदेवाय नमः।
७. श्री विरूपाक्षाय नमः।
८. श्री कपर्द्दिने नमः।
९. श्री नीललोहिताय नमः।
१०. श्री शंकराय नमः।
११. श्री शूलपाणये नम :
१२. श्री खट्वांगधारिणे नमः।
१३. श्री विष्णुवल्लभाय नमः।
१४. श्री शिपिविष्टाय नमः।
१५. श्री अम्बिकानाथाय नमः।
१६. श्री श्रीकण्ठाय नमः।
१७. श्री भक्तवत्सलाय नमः।
१८. श्री भवाय नमः।
१९. श्री शर्वाय नमः।
२०. श्री त्रिलोकेशाय नमः।
२१. श्री शितिकण्ठाय नमः।
२२. श्री शिवाप्रियाय नमः।
२३. श्री उग्राय नमः।
२४. श्री कपालिने नमः।
२५. श्री कामारये नमः।
२६. श्री अन्धकासुरसूदनाय नमः।
२७. श्री गंगाधराय नमः।
२८. श्री ललाटाक्षाय नमः।
२९. श्री कालकालाय नमः।
३०. श्री कृपानिधये नमः।
३१. श्री भीमाय नमः।
३२. श्री परशुहस्ताय नमः।
३३. श्री मृगपाणये नमः।
३४. श्री जटाधराय नमः।
३५. श्री कैलासवासिने नमः।
३६. श्री कवचये नमः।
३७. श्री कठोराय नमः।
३८. श्री त्रिपुरान्तकाय नमः।
३९. श्री वृषांकाय नमः।
४०. श्री वृषभारूढ़ाय नमः।
४१. श्री भस्मोद्धूलित विग्रहाय नमः।
४२. श्री सामप्रियाय नमः।
४३. श्री स्वरमयाय नमः।
४४. श्री त्रयीमूर्तये नमः।
४५. श्री अनीश्वराय नमः।
४६. श्री सर्वज्ञाय नमः।
४७. श्री परमात्मने नमः।
४८. श्री सोमसूर्याग्निलोचनाय नमः।
४९. श्री हविर्यज्ञमयाय नमः।
५०. श्री सोमाय नमः।
५१. श्री पञ्चवक्त्राय नमः।
५२. श्री सदाशिवाय नमः।

५३. श्री विश्वेश्वराय नमः।	८१. श्री अहिर्बुध्न्याय नमः।
५४. श्री वीरभद्राय नमः।	८२. श्री दिगम्बराय नमः।
५५. श्री गणनाथाय नमः।	८३. श्री अष्टमूर्तये नमः।
५६. श्री प्रजापतये नमः।	८४. श्री अनेकात्मने नमः।
५७. श्री हिरण्यरेतसे नमः।	८५. श्री सात्त्विकाय नमः।
५८. श्री दुर्द्धर्षाय नमः।	८६. श्री शुद्धविग्रहाय नमः।
५९. श्री गिरीशाय नमः।	८७. श्री शाश्वताय नमः।
६०. श्री गिरिशाय नमः।	८८. श्री खण्डाय नमः।
६१. श्री अनघाय नमः।	८९. श्री परशुरजसे नमः।
६२. श्री भुजंगभूषणाय नमः।	९०. श्री पाशविमोचनाय नमः।
६३. श्री भर्गाय नमः।	९१. श्री मृडाय नमः।
६४. श्री गिरिधन्विने नमः।	९२. श्री पशुपतये नमः।
६५. श्री गिरिप्रियाय नमः।	९३. श्री अव्याय नमः।
६६. श्री कृत्तिवासाय नमः।	९४. श्री महादेवाय नमः।
६७. श्री पुरारये नमः।	९५. श्री देवाय नमः।
६८. श्री भगवते नमः।	९६. श्री प्रभवे नमः।
६९. श्री प्रमथाधिपाय नमः।	९७. श्री पूषदन्तविदारिणे नमः।
७०. श्री मृत्युञ्जयाय नमः।	९८. श्री व्यग्राय नमः।
७१. श्री सूक्ष्मतनवे नमः।	९९. श्री दशाध्वरहरये नमः।
७२. श्री जगद्व्यापिने नमः।	१००. श्री हराय नमः।
७३. श्री जगद्गुरवे नमः।	१०१. श्री भगनेत्रभिदे नमः।
७४. श्री व्योमकेशाय नमः।	१०२. श्री अव्यक्ताय नमः।
७५. श्री महासेनाय नमः।	१०३. श्री सहस्राक्षाय नमः।
७६. श्री जनकाय नमः।	१०४. श्री सहस्रपातये नमः।
७७. श्री चारूविक्रमाय नमः।	१०५. श्री अपवर्गप्रदाय नमः।
७८. श्री रुद्राय नमः।	१०६. श्री अनन्ताय नमः।
७९. श्री भूतपतये नमः।	१०७. श्री तारकाय नमः।
८०. श्री स्थाणवे नमः।	१०८. परमेश्वराय नमः।

इसके उपरान्त बैठकर हाथ जोड़कर शिवजी की स्तुति करें :-

त्रिनेत्राय नमस्तुभ्यं उमादेहार्धधारिणे।
त्रिशूलधारिणे तुभ्यं भूतानां पतये नमः।।
गंगाधर नमस्तुभ्यं वृषभध्वज नमोस्तुते।
आशुतोष नमस्तुभ्यं भूयो भूयो नमो नमः।
आवाहनं न जानामि न जानामि विसर्जनम्।
पूजां चैव न जानामि क्षमस्त परमेश्वर

इसके बाद देवताओं का उत्तर पूजन करें तथा प्रणाम करें -

सौराष्ट्रे सोमनाथं च श्रीशैलेमल्लिकार्जुनम्।
उज्जयिन्यां महाकाल ओंकारममरेश्वरम्।।
केदार हिमवत्पृष्ठे डाकिन्यां भीमशंकरम्।
वाराणस्यां च विश्वेशं त्र्यम्बकं गौतमीतटे।।
वैद्यनाथ चिताभूमौ नागेशं दारुकावने।
सेतुबन्धे च रामेशं घुष्मेशं च शिवालये।।
द्वादशैतानि नमामि पूजाकाले सदा पठेत्।।

करचरणकृतं वा क्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम्।।
विहितमविहितं वाः सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शंभो।।

नमः पार्वतीपतये हर हर।

काल हर, कंटक हर, दुःख हर, दारिद्र्य हर।
हर हर कहे तो हारे क्यों, हर का नाम विसारे क्यों।

अनेन श्री रुद्रपूजाभिषेककर्मणा भगवद्भवानीशंकर देवता प्रीयतां न मम।। ॐ शिवार्पणमस्तु।।

ॐ नमः शिवाय।। ॐ नमः शिवाय।। ॐ नमः शिवाय।।

अथ पौराणिक रुद्राभिषेक

वेदों एवं पुराणों में शिवार्चन की अनेक विधियाँ वर्णन की गयी हैं। वेद के मंत्रों से अभिषेक करना सर्वसाधारण के वश की बात नहीं हैं। अतएव यहाँ श्री महाभारत के द्रोण-पर्व में वर्णित पौराणिक रुद्राभिषेक दे रहे हैं। भगवान् श्रीकृष्ण ने अर्जुन को इस विधि का उपदेश किया था। इसके अनेक प्रकार हैं। संतान की इच्छा वाला तन्डुल से, धन प्राप्ति के लिए बिल्वपत्र से, कन्या के लिए धान्य से (समूचे धान), दीर्घायु के लिए दूर्वाङ्कुर से, पशु-वाहन-भृत्य आदि की इच्छा के लिए गोघृत की धारा से, शत्रु नाश के लिए कुशोदक से श्री आशुतोष भगवान् शिव पर यह श्लोक बोलकर कम से कम ११ बार अभिषेक करना चाहिए। यह अभिषेक विधि भी सद्यःफलदायी है।

अभिषेक श्लोकाः

ॐ नमो भवाय शर्वाय रुद्राय वरदाय च।
पशूनांपतये नित्यं उग्राय च कपर्दिने ।।१।।
महादेवाय भीम्राय त्र्यम्बकाय शिवाय च।
ईशानायमखघ्नाय नमस्ते मखघातिने ।।२।।
कुमारगुर्वे नित्यं नीलग्रीवाय वेधसे।
विलोहिताय धूम्राय ब्याधिने चापराजिते ।।३।।
नित्यं नील शिखंडाय शूलिने दिव्यचक्षुषे।
हन्त्रे गोत्रे त्रिनेत्राय व्याधाय च सुरेतसे ।।४।।
अचिन्त्यायाम्बिकामंत्र सर्वदेवस्तुताय च।
वृषभध्वजाय मुण्डाय जटिने ब्रह्मचारिणे ।।५।।

विश्वात्मके विश्वसृजे विश्वमावृत्त तिष्ठते।
नमो नमस्ते सत्याय भूतानां प्रभवे नमः ।।६।।
पंचवक्त्राय शर्वाय शंकराय शिवाय च।
नमोऽस्तु वाचस्पतये प्रजानांपतये नमः ।।७।।
विश्वस्यपतये नित्यं महतांपतये नमः।
नमः सहस्रशीर्षाय सहस्रभुजमन्यवे ।।८।।
सहस्रनेत्रपादाय नमः सांख्याय कर्मणे ।।९।।
नमो हिरण्यवर्णाय हिरण्यकवचाय च।
भक्तानुकंपिने नित्यं सिद्ध्यतां नो वर प्रभो ।।१०।।
एवं स्तुस्त्वा महादेवं वासुदेवसहार्जुनः।
प्रसादयामासभवं तदा शस्त्रोपलब्धये ।।११।।

।। ॐ नमः पार्वतीपतये हर हर हर महादेव ॐ।।

परिशिष्ट–प्रथमः (१)

अथ पार्थिव पूजनविधिः

जिस समय ब्रह्मा और विष्णु का विवाद हुआ था उस समय उनका गर्व दूर करने के लिए भगवान शंकर लिंगरूप में प्रकट हुए थे तथा उनका गर्व दूर किया था। उस समय उन्होंने उन दोनों एवं सम्पूर्ण विश्व को अपने अनन्तस्वरूप के दर्शन कराये थे। वहीं से लिङ्गार्चन आरंभ हुआ। लिङ्गों के अनेक प्रकार हैं। शिवपुराण एवं स्कन्दपुराणों में विविध प्रकार के शिवलिंगों का वर्णन तथा पूजन का फल भी लिखा है। यथा – रत्नलिङ्ग, धातुलिङ्ग, स्वयंभूलिङ्ग, बाणलिङ्ग, ज्योतिर्लिङ्ग, रसलिङ्ग, नमर्देश्वरलिङ्ग, पार्थिवेश्वरलिङ्ग आदि अनेक प्रकार के लिङ्गों का वर्णन मिलता है। यहाँ यही सोचकर शान्ति हो जाती है कि-

शिवतत्वं न जानामि कीदृशोऽसि महेश्वर।
यादृशोऽसि महादेव तादृशाय नमोस्तु ते।।

अतएवं यहाँ हम पार्थिवेश्वर लिंग की सामान्य पूजन विधि का वर्णन करते हैं। यों तो पार्थिव नाम पृथ्वी से उत्पन्न होने का है। अतः सभी पाषाणलिंग पार्थिवेश्वर होते हैं, किन्तु प्रायः मिट्टी एवं बालू आदि से निर्मित लिंग को ही पार्थिवेश्वरलिङ्ग कहते हैं।

पार्थिवेश्वरलिङ्ग पूजन क्रम

आरम्भ में पहले लिखी विधि के अनुसार आचमन, प्राणायाम, भूशुद्धि, जलशुद्धि, स्वस्तिवाचन, संकल्प आदिक सारे कृत्य करें।

हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्।।
शिवःपशुपतिश्चैव महादेव विसर्जनम्।।

"ॐ ह्रां पृथिव्यै नमः" मंत्र से पृथ्वी की प्रार्थना करें।

"ॐ हराय नमः" कहकर मृत्तिका ग्रहण करें।

"ॐ बं" कहकर मिट्टी गूँथें।

"ॐ शूलपाणये नमः" से प्रतिमा की स्थापना करें।

इसके बाद हाथ में जल लेकर विनियोग छोड़ें –

ॐ अस्य श्री शिवपंचाक्षरमन्त्रस्य वामदेवऋषिः अनुष्टुप्छन्दः श्रीसदाशिवो देवता ॐ बीजं। नमः शक्तिः। शिवाय कीलकं। ममसाम्बसदाशिवप्रीतये पूजने – जपे च विनियोगः।।

ॐ वामदेवाय ऋषये नमः शिरसि। ॐ अनुष्टुप्छन्दसे नमः मुखे। ॐ सदाशिवदेवतायै नमः हृदि। ॐ बीजाय नमः गुह्ये। ॐ शक्तये नमः पादयोः। ॐ शिवायकीलकाय नमः सर्वाङ्गे। ॐ शिं सद्योजाताय नमः गुह्ये। ॐ वां वामदेवाय नमो मूर्ध्नि। ॐ यं ईशानाय नमो मुखे। ॐ अं अंगुष्ठाभ्याम् नमः। ॐ नं तर्जनीभ्याम् स्वाहा। ॐ मं मध्यमाभ्याम् वषट्। ॐ शिं अनामिकाभ्याम् हुं। ॐ वां

कनिष्ठिकाभ्याम् वौषट्। ॐ यं करतलकरपृष्ठाभ्याम् फट्। ॐ हृदयाय नमः। ॐ नं शिरसे स्वाहा। ॐ मं शिखायै वषट्। ॐ शिं कचवाय हुँ। ॐ वां नेत्रत्रयाय वौषट्। ॐ यं अस्त्राय फट्।

इस प्रकार अंगन्यास करने के बाद प्राण प्रतिष्ठा करें। विनियोग–

ॐ अस्य श्री प्राणप्रतिष्ठामंत्रस्य बह्मविष्णुमहेश्वराः ऋषयः ऋग्यजुः सामानिच्छन्दांसि क्रियामय वपुः – प्राणाख्या देवता आँ बीजम्, ह्रीं शक्तिः, क्रौं कीलकम्, देवप्राणप्रतिष्ठापने विनियोगः।

ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि। ऋग्यजुःसामच्छन्दसेभ्यो नमो मुखे। प्राणाख्या देवतायै नमः हृदि। आँ बीजाय नमो गुह्ये। क्लीं शक्तये नमः पादयोः। क्रौं कीलकाय नमः सर्वांगे।

ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं शिवस्य प्राणाः इह प्राणाः।। ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं शिवस्य जीव इह स्थितः।। ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं शिवस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षु-श्रोत्र-घ्राण-जिह्वा-पाणि-पाद-पायूपस्थानि इहागत्य सुखं-चिरं-तिष्ठन्तु स्वाहा।।

इसके बाद हाथ में ही पार्थिवलिङ्ग लिए हुए शिवजी का आवाहन करें –

ॐ भूः पुरुषं साम्बसदाशिवमावाहयामि।
ॐ भुवः पुरुषं साम्बसदाशिवमावाहयामि।
ॐ स्वः पुरुषं साम्बसदाशिवमावाहयामि।

स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम्।।
तावत्वं प्रीतिभावेन लिङ्गेस्मिन् सन्निधिं कुरु।।

शिवार्चन की यथा साध्य विधि से शिवजी का पूजन करके सुन्दर कोमल अछिद्र बिल्वपत्र ठीक करें। यदि सम्भव हो तो उन पर अष्टगंध या लाल चन्दन से "ॐ नमः शिवाय" अथवा "श्रीराम" का लेखन कर लें। स्ववित्तानुसार सोने या चाँदी का बिल्वपत्र चढ़ाना अति उत्तम होता है। इसके करने से समस्त दैहिक, दैविक, भौतिक तापों का शमन, ग्रहोपग्रहजन्य पीड़ा शान्त होती है तथा धर्म, अर्थ, काम, मोक्ष, आयु, आरोग्य, ऐश्वर्य आदि की प्राप्ति के साथ-साथ मनोकामनाएँ पूरी होती हैं। इस अनुष्ठान को आगे लिखी विधि से करें।

।। संकल्पः ।।

ॐ विष्णुः ३ अद्येत्यादि देशकालौ संकीर्त्य गोत्रः ..... शर्माऽहं मम जन्मराशेः वर्तमान नवग्रहजन्य पीड़ा परिहारार्थं दैहिक दैविक भौतिक त्रिविध तापोपशमनार्थं नानाविध्यागतभयनिरसनपूर्वकं उत्तमायुरारोग्य ऐश्वर्याभिवृद्ध्यर्थं पुरुषार्थचतुष्टयसिद्ध्यर्थं स्थिर धनलक्ष्मी पुत्र पौत्र प्रपौत्र सुखावाप्तये अस्थिर लक्ष्मी चिरकाल पर्यंतं संरक्षणार्थं पूर्वजन्म पुण्योदय फलस्वरूपेण प्राप्ते पुण्यावसरे जन्म जन्मान्तर कृत समस्त पातकोपपातकक्षयार्थं साम्बसदाशिव प्रीत्यर्थं अष्टोत्तरशत स्तोत्रं मंत्रैः बिल्वपत्रार्चनमहं करिष्ये।

।। विनियोगः ।।

ॐ अस्य श्री बिल्वपत्रार्पण स्तोत्र मन्त्रस्य ऋषभ शिव योगीश्वर ऋषिः साम्बसदाशिवोदेवता अनुष्टुप्छन्दः ॐ बीजं नमः शक्तिः शिवायेति कीलकम् अष्टोत्तरशत स्तोत्र मंत्रैः बिल्वपत्र समर्पणे विनियोगः।

।। अथ न्यास विधानम् ।।

ॐ सदाशिवाय - अंगुष्ठाभ्यां नमः ।।

ॐ नं गंगाधराय - तर्जनीभ्यां नमः ।।

ॐ मं मृत्युञ्जयाय - मध्यमाभ्यां नमः ।।

ॐ शिं शूलपाणये - अनामिकाभ्यां नमः ।।

ॐ वां पिनाकिने - कनिष्ठिकाभ्यां नमः ।।

ॐ यं उमापतये - करतलकरपृष्ठाभ्यां नमः ।।

।। अथ षडङ्गन्यासः ।।

ॐ सदाशिवाय - हृदयाय नमः ।।

ॐ नं गंगाधराय - शिरसे स्वाहा ।।

ॐ मं मृत्युञ्जयाय - शिखायै वषट् ।।

ॐ शिं शूलपाणये - कवचाय हुं ।।

ॐ वां पिनाकिने - नेत्रत्रयाय वौषट् ।।

ॐ यं उमापतये - अस्त्राय फट् ।।

।। अथध्यानम् ।।

शान्तं पद्मासनस्थं शशिधरमुकुटं दिव्य कर्पूर गौरं।
शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहन्तं ।।
नांग पाशं च घण्टां प्रलयहुतवहं सांकुशं वामभागे।
नानालंकारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि ।।

बिल्वपत्रसमर्पणश्लोकाः

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम्।।
त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम्।।१।।

त्रिशाखैः बिल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभम्।।
तव पूजां करिष्यामि बिल्वपत्रं शिवार्पणम्।।२।।

सर्वत्रैलोक्यकर्तारं सर्वत्रैलोक्यपालकम्।।
सर्वत्रैलोक्य हर्तारं बिल्वपत्रं शिवार्पणम्।।३।।

नागाधिराज वलयं नागहारेण भूषितम्।।
नागकुण्डलसंयुक्तं बिल्पत्रं शिवार्पणम्।।४।।

अक्षमालाधरं रुद्रं पार्वती प्रिय बल्लभम्।।
चन्द्रशेखरमीशानं बिल्वपत्रं शिवार्पणम्।।५।।

त्रिलोचनं दशभुजं दुर्गादिहार्ध धारिणाम्।।
विभूत्याभ्यर्चितो देवं बिल्वपत्रं शिवार्पणम्।।६।।

त्रिशूलधारिणं देवं नानाभरण सुन्दरम्।।
चन्द्रशेखरमीशानं बिल्वपत्रं शिवार्पणम्।।७।।

गंगाधरं अम्बिकानाथं फणिकुण्डल मण्डितम्।।
कालकालं गिरीशं च बिल्वपत्रं शिवार्पणम्।।८।।

शुद्धस्फटिकसंकाशं शितिकण्ठं कृपानिधिम्।।
सर्वेश्वरं सदाशान्तं बिल्वपत्रं शिवार्पणम्।।९।।

सच्चिदानन्दरूपं च परानन्दमयं शिवम्।।
वागीश्वरं चिदाकाशं बिल्वपत्रं शिवार्पणम्।।१०।।

शिपिविष्टं सहस्राक्षं दुंदुभ्यश्च निषंगिणम्।।
हिरण्यबाहुं सेवान्यं बिल्वपत्रं शिवार्पणम्।।११।।

अरुणं वामनंतारं वास्तव्यं चैववास्तवम् ।।
ज्येष्ठं कनिष्ठं घैशन्तं बिल्वपत्रं शिवार्पणम् ।।१२।।

हरिकेशं संनदीशं उच्चैघोषं सनातनम् ।।
अघोररूपं कर्मं बिल्वपत्रं शिवार्पणम् ।।१३।।

पूर्वजाऽपरजंयाम्यं सूक्ष्मतस्कर नायकम् ।।
नीलकंठ जघन्यं च बिल्वपत्रं शिवार्पणम् ।।१४।।

सुराश्रयं विषहरं कर्मिणां च बरूथिनम् ।।
महासेनं महावीरं बिल्वपत्रं शिवार्पणम् ।।१५।।

कुमारं कुशलं कूप्यं वदान्यं च महारथम् ।।
तौर्यातौयं च देव्यं च बिल्वपत्रं शिवार्पणम् ।।१६।।

दशकर्णं ललाटाक्षं पञ्चवक्त्रं सदाशिवम् ।।
अशेषपापसंहारं बिल्वपत्रं शिवार्पणम् ।।१७।।

नीलकण्ठ जगद्वंद्यं दीनानाथ महेश्वरम् ।।
महापापहरं शंभुं बिल्वपत्रं शिवार्पणम् ।।१८।।

चूड़ामणि कृत्त विधुं बलयीकृत्त वासुकिम् ।।
कैलाशनिलयं भीमं बिल्वपत्रं शिवार्पणम् ।।१९।।

कर्पूर कुन्दधवलं नरकार्णव तारकम् ।।
करुणामृत सिन्धुं च बिल्वपत्रं शिवार्पणम् ।।२०।।

महादेवं महात्मानं भुजंगाधिपकंकणम् ।।
महापापहरंदेवं बिल्वपत्रं शिवार्पणम् ।।२१।।

भूतेशं खण्डपरशुं वामदेवं पिनाकिनम् ।।
वामेशक्तिधंर श्रेष्ठं बिल्वपत्रं शिवार्पणम् ।।२२।।

कालेक्षणं विरूपाक्षं श्रीकण्ठं भक्तवत्सलम् ।।
नीललोहित खट्वाङ्गं बिल्वपत्रं शिवार्पणम् ।।२३।।

कैलाशवासिनं भीमं कठोरं त्रिपुरान्तकम् ।।
वृषाङ्कं बृषभारूढं बिल्वपत्रं शिवार्पणम् ।।२४।।

सामप्रियं सर्वमयं भस्मोद्धूलितविग्रहम् ।।
मृत्युञ्जयं लोकनाथं बिल्वपत्रं शिवार्पणम् ।।२५।।

दारिद्र्यदुखहरणं रविचन्द्रानलेक्षणम् ।।
मृगपाणिं चन्द्रमौलिं बिल्वपत्रं शिवार्पणम् ।।२६।।

सर्वलोकमयाकारं सर्वलोकैक साक्षिणम् ।।
निर्मलं निर्गुणाकारं बिल्वपत्रं शिवार्पणम् ।।२७।।

सर्व तत्वात्मकं साम्बं सर्वतत्त्वविदूरकम् ।।
सर्व तत्वस्वरूपं च बिल्वपत्रं शिवार्पणम् ।।२८।।

सर्वलोकगुरुं स्थाणुं सर्वलोक वरप्रदम् ।।
सर्वलोकैकनेत्रं च बिल्वपत्रं शिवार्पणम् ।।२९।।

मन्मथोद्धरणं शैवं भवभर्ग परात्परम् ।।
कमला प्रियपूज्यं च बिल्वपत्रं शिवार्पणम् ।।३०।।

तेजोमयं महाभीमं उमेशं भस्मलेपनम् ।।
भवरोगविनाशं च बिल्वपत्रं शिवार्पणम् ।।३१।।

स्वर्गापवर्ग फलदं रघुनाथप्रदम् ।।
नागराज सुताकान्तं बिल्वपत्रं शिवार्पणम् ।।३२।।

मञ्जीरपाद युगलं शुभलक्षण लक्षितम् ।।
फणिराज विराजं च बिल्वपत्रं शिवार्पणम् ।।३३।।

निरामयं निराधारं निःसर्गं निष्प्रपञ्चकम् ।।
तेजोरूपं महारौद्रं बिल्वपत्रं शिवार्पणम् ।।३४।।

सर्वलोकैक पितरं सर्व लोकैक मातरम् ।।
सर्वलोकैक नाथं च बिल्वपत्रं शिवार्पणम् ।।३५।।

चित्राम्बरं निराभासं वृषभेश्वरवाहनम्।।
नीलग्रीवं चतुर्वक्त्रं बिल्वपत्रं शिवार्पणम्।।३६।।

रत्नकंचुक रत्नेशं रत्नकुण्डल मण्डितम्।।
नवरत्न किरीटं च बिल्वपत्रं शिवार्पणम्।।३७।।

दिव्य रत्नाङ्गुली स्वर्णं कण्ठाभरणभूषितम्।।
नानारत्न मणिमयं बिल्वपत्रं शिवार्पणम्।।३८।।

रत्नांगुलीयविलसत् करशाखा नखप्रभम्।।
भक्तमानसगेहं च बिल्वपत्रं शिवार्पणम्।।३९।।

वामाङ्गभागे विलसद् अम्बिकावीक्षणं प्रियम्।।
पुण्डरीकमिवाक्षं च बिल्वपत्रं शिवार्पणम्।।४०।।

सम्पूर्ण कामदं सौख्यं भक्तेष्टं फलकारकम्।।
सौभाग्यदं हितकारं बिल्वपत्रं शिवार्पणम्।।४१।।

नानाशास्त्रगुणोपेतं स्फुरन्मङ्गल विग्रहम्।।
विद्या त्रिभेदरहितं बिल्वपत्रं शिवार्पणम्।।४२।।

अप्रमेयं गुणाधारं वेदकृद्रूप विग्रहम्।।
धर्माधर्म प्रवृत्तं च बिल्वपत्रं शिवार्पणम्।।४३।।

गौरी विलास सदनं जीवजीव पितामहम्।।
कल्पान्त भैरवं शुभ्रं बिल्वपत्रं शिवार्पणम्।।४४।।

सुखदं सुखनाशं च दुःखदं दुःखनाशनम्।।
दुःखावतारं भद्रं च बिल्वपत्रं शिवार्पणम्।।४५।।

सुखरूपं रूपनाशं सर्वधर्म फलप्रदम्।।
अतीन्द्रियं महामायं बिल्वपत्रं शिवार्पणम्।।४६।।

सर्वपक्षि मृगाकारं सर्वपक्षि मृगाधिपम्।।
सर्वपक्षि मृगाधारं बिल्वपत्रं शिवार्पणम्।।४७।।

जीवाध्यक्षं जीववन्द्यं जीव जीवन रक्षकम् ।।
जीकृज्जीवहरणं बिल्वपत्रं शिवार्पणम् ।।४८।।

विश्वात्मानं विश्ववन्द्यं जङ्गात्मावज्रहस्तकम् ।।
बज्रेशं बज्रभूषं च बिल्वपत्रं शिवार्पणम् ।।४९।।

गणाधिपं गणाध्यक्षं प्रलयानल नाशनम् ।।
जितेन्द्रियं वीरभद्रं बिल्वपत्रं शिवार्पणम् ।।५०।।

त्रयम्बकं मतं शूरं अरिषड्वर्ग नाशनम् ।।
दिगम्बरं क्षोभनाशं च बिल्वपत्रं शिवार्पणम् ।।५१।।

कुन्देन्दुशङ्खधवलं भगनेत्रमिदुज्चलम् ।।
कालाग्निरुद्र सदृशं बिल्वपत्रं शिवार्पणम् ।।५२।।

कम्बुग्रीवं कम्बुकण्ठं धैर्यदं धैर्यवर्धकम् ।।
शार्दूलं चर्मवसनं बिल्वपत्रं शिवार्पणम् ।।५३।।

जगदुत्पत्ति हेतुं च जगत्प्रलय कारकम् ।।
पूर्णानन्दस्वरूपं च बिल्वपत्रं शिवार्पणम् ।।५४।।

स्वर्णकेशं महत्तेजं पुण्यश्रवण कीर्तनम् ।।
ब्रह्माण्ड नायकं तारं बिल्वपत्रं शिवार्पणम् ।।५५।।

मन्दारमूलनिलयं मन्दारकुसुमप्रियम् ।।
वृन्दारकप्रियतरं बिल्वपत्रं शिवार्पणम् ।।५६।।

महेन्द्रियं महाबाहुं विश्वास परिपूरकम् ।।
सुलभासुलभं लभ्यं बिल्वपत्रं शिवार्पणम् ।।५७।।

बीजाधारं बीजरूपं निर्बीजंवीजवृद्धिदम् ।।
परेशं बीजनाशं च बिल्वपत्रं शिवार्पणम् ।।५८।।

युगाकारं युगाधीशं युगकृतयुगनाशनम् ।।
परेशं बीजनाशं च बिल्वपत्रं शिवार्पणम् ।।५९।।

धूर्जटिंपिङ्गलजटा जय मण्डल मण्डितम् ।।
कर्पूरगौरं गिरीशं बिल्वपत्रं शिवार्पणम् ।।६०।।

सुरावासं जनावासं योगीशं योगपुङ्गवम् ।।
योगदे योगिनांसिंहं च बिल्वपत्रं शिवार्पणम् ।।६१।।

उत्तमानुत्तमं तत्वं अन्धकासुरसूदनम् ।।
भक्तकल्पद्रुमस्तोमं बिल्वपत्रं शिवार्पणम् ।।६२।।

विचित्रमाल्यवसनं दिव्यचन्दन चर्चितम् ।।
विष्णुब्रह्मादिवंद्यं च बिल्वपत्रं शिवार्पणम् ।।६३।।

कुमारं पितरं देवं स्थितचन्द्रकलानिधिम् ।।
ब्रह्मसत्यं जगन्भिन्नं बिल्वपत्रं शिवार्पणम् ।।६४।।

लावण्यमधुराकारं करुणारसवारिधिम् ।।
भ्रुवोर्मध्ये सहस्रार्चि बिल्वपत्रं शिवार्पणम् ।।६५।।

जटाधरं पाषकाक्षं ऋक्षेशं भूमिनायकम् ।।
कामदं सर्वदागम्यं बिल्वपत्रं शिवार्पणम् ।।६६।।

शिवं शान्तं उमानाथं महाध्यान परायणम् ।।
ज्ञानप्रदं कृत्तिवासं बिल्वपत्रं शिवार्पणम् ।।६७।।

वासुक्युरुग्रहारं च लोकानुग्रहकारणम् ।।
कोटिकन्यां महादानं बिल्वपत्रं शिवार्पणम् ।।६८।।

शशाङ्कधारिणं गर्भं सर्वलोकैक शङ्करम् ।।
शुद्धं च शाश्वतं नित्यं बिल्वपत्रं शिवार्पणम् ।।६९।।

शरणागतदीनार्त परित्राण परायणम् ।।
गम्भीरं वषटाकारं बिल्वपत्रं शिवार्पणम् ।।७०।।

भोक्तारं भोजनं भोज्यं जेतारं जितमानसम् ।।
करणं कारणं विष्णुं बिल्वपत्रं शिवार्पणम् ।।७१।।

क्षेत्रज्ञं क्षेत्रपालं च परार्थैक प्रयोजनम् ।।
व्योमकेशं भीमवेशं बिल्वपत्रं शिवार्पणम् ।।७२।।

भवघ्नं करुणोपेतं क्षोदिष्टं यमनाशकम् ।।
हिरण्यगर्भं हेमाङ्गं बिल्वपत्रं शिवार्पणम् ।।७३।।

दक्षं चामुण्डजनकं मोक्षदं मोक्षनायकम् ।।
हिरण्यदं हेमरूपं बिल्वपत्रं शिवार्पणम् ।।७४।।

महाश्मशाननिलयं प्रच्छन्नं स्फटिकप्रभम् ।।
वेदाश्वं वेदरूपं च बिल्वपत्रं शिवार्पणम् ।।७५।।

स्थिरं स्वधर्मनाथं ब्रह्मण्यं चाश्रय विभुम् ।।
जगन्निवासं प्रमथं बिल्वपत्रं शिवार्पणम् ।।७६।।

रुद्राक्षमालाभरणं रुद्राक्षं प्रियदर्शनम् ।।
रुद्राक्षभक्त संस्तोभं बिल्वपत्रं शिवार्पणम् ।।७७।।

फणीन्द्रविलसद्कण्ठं भुजंगाभरण प्रियम् ।।
दक्षाध्वर विनाशं च बिल्वपत्रं शिवार्पणम् ।।७८।।

नागेन्द्र विलसद्कर्णं महेन्द्रवलावृतम् ।।
मुनिवंद्यं मुनिश्रेष्ठं बिल्वपत्रं शिवार्पणम् ।।७९।।

मृगेन्द्रचर्मवसनं मुनीनामेक जीवनम् ।।
सर्वदेवादि पूज्यं च बिल्वपत्रं शिवार्पणम् ।।८०।।

निधनेशं धनाधीशं अपमृत्यु विनाशनम् ।।
लिङ्गमूर्ति अलिङ्गात्मं बिल्वपत्रं शिवार्पणम् ।।८१।।

भक्तकल्याणदं व्यस्तं वेदवेदान्त संस्तुतम् ।।
कल्पकृत् कल्पनाशं च बिल्वपत्रं शिवार्पणम् ।।८२।।

घोरपातक दावाग्निं जन्मकर्म विवर्जितम् ।।
कपालमालाभरणं बिल्वपत्रं शिवार्पणम् ।।८३।।

मातङ्गचर्मवसनं विरदं पवित्रधारकम् ।।
विष्णुक्रान्तं अनन्तं च बिल्वपत्रं शिवार्पणम् ।।८४।।
यज्ञकर्म फलाध्यक्षं यज्ञविघ्नविनाशकम् ।।
यज्ञेशं यज्ञभोक्तारं बिल्वपत्रं शिवार्पणम् ।।८५।।
कालाधीशं त्रिकालज्ञं दुष्टनिग्रहकारकम् ।।
योगीमानसपूज्यं च बिल्वपत्रं शिवार्पणम् ।।८६।।
महोन्नतं महाकायं महोदर महाभुजम् ।।
महावक्रं महावृद्धं बिल्वपत्रं शिवार्पणम् ।।८७।।
सुनेत्रं सुललाटं च सर्वभीमपराक्रमम् ।।
महेश्वरं शिवतरं बिल्वपत्रं शिवार्पणम् ।।८८।।
समस्त जगदाधारं समस्त गुणसागरम् ।।
सत्यं सत्यगुणोपेतं बिल्वपत्रं शिवार्पणम् ।।८९।।
माघकृष्णचतुर्दश्यां पूजार्थं च जगद्गुरुम् ।।
दुर्लभं सर्वदेवानां बिल्वपत्रं शिवार्पणम् ।।९०।।
तत्रापिदुर्लभंमन्ये नभोमासेन्दुवासरे ।।
प्रदोषकाले पूजां च बिल्वपत्रं शिवार्पणम् ।।९१।।
शालग्रामेषु विप्राणां तटोकेशतकूपयोः ।।
कोटिकन्या महादानं बिल्वपत्रं शिवार्पणम् ।।९२।।
दर्शनं बिल्वबृक्षस्य स्पर्शनं पापनाशनम् ।।
अघोरपापसंहारं बिल्वपत्रं शिवार्पणम् ।।९३।।
तुलसीबिल्वनिर्गुंडी जम्बीरमलकंतथा ।।
पञ्चबिल्वमितिख्यातं बिल्वपत्रं शिवार्पणम् ।।९४।।
अखण्डैः बिल्वपत्रैश्च पूजयेच्छिवशंकरम् ।।
मुच्यते सर्वपापेभ्यो बिल्वपत्रं शिवार्पणम् ।।९५।।
सालंकृताशतावृत्या कन्याकोटि सहस्त्रकम् ।।
साम्राज्यं पृथिवीदानं बिल्वपत्रं शिवार्पणम् ।।९६।।

दशकोटि तुरंगानां अश्वमेध सहस्त्रकम्।।
सवत्स धेनुकोटीनां बिल्वपत्रं शिवार्पणम्।।९७।।

चतुर्वेद सहस्त्राणि भारतादि पुराणकम्।।
साम्राज्यं पृथ्वीदानं बिल्वपत्रं शिवार्पणम्।।९८।।

सर्वरत्नमयंमेरुं कांचनं दिव्यवस्त्रकम्।।
तुलाभागं शतावृत्तं बिल्वपत्रं शिवार्पणम्।।९९।।

अष्टोत्तरशतं बिल्वं योऽर्चयेत् लिङ्गमस्तके।।
अथर्वोक्तं वदेद्यस्तु बिल्वपत्रं शिवार्पणम्।।१००।।

काशीक्षेत्र निवासीच कालभैरव दर्शनम्।।
अघोरपापसंहारं बिल्वपत्रं शिवार्पणम्।।१०१।।

अष्टोत्तरशतैः श्लोकैः स्तोत्राद्यैः पूजयेतथा।।
त्रिसन्ध्यं मोक्षमवाप्रोति बिल्वपत्रं शिवार्पणम्।।१०२।।

दन्ति कोटि सहस्त्राणां भूहिरण्यं सहस्त्रकम्।।
सर्वं क्रतुमयं पुण्यं बिल्वपत्रं शिवार्पणम्।।१०३।।

पुत्र पौत्रादि भोगं च शुक्तवाचात्र यथोप्सितम्।।
अन्तं च शिवसायुज्यं बिल्वपत्रं शिवार्पणम्।।१०४।।

विप्रकोटि सहस्त्रानां वित्तदानाच्चयत्फलम्।।
तत्फले प्राप्नुयात्सत्यं बिल्वपत्रं शिवार्पणम्।।१०५।।

त्वन्नमकीर्तनं तदवत् तवपाम्बुपसेवनम्।।
जीवनन्मुक्तो भवेनित्यं बिल्वपत्रं शिवार्पणम्।।१०६।।

अनेकदानफलदं अनन्तसुकृतादिकम्।।
तीर्थयात्रादिकं पुण्यं बिल्वपत्रं शिवार्पणम्।।१०७।।

त्वंमाम्पालय सर्वत्र पदध्यानं कृतं तव।।
भवनं शांकरं नित्यं बिल्वपत्रं शिवार्पणम्।।१०८।।

फलश्रुतिः

एककाले पठेन्नित्यं सर्वशत्रु विदारणम् ।।
द्विकाले च पठेन्नित्यं बिल्वपत्रं शिवार्पणम् ।।१०९ ।।
एकैक बिल्वपत्रेण कोटि यज्ञफलं लभेत् ।।
महादेवस्य पूजार्थं बिल्वपत्रं शिवार्पणम् ।।११० ।।
अमृतोद्भववृक्षस्य महादेवप्रियस्य च ।।
कण्ठकाघाताद्कण्टकेभ्यो बिल्वपत्रं शिवार्पणम् ।।१११ ।।
त्रिकालेयः पठेन्नित्यं मनोवांछा फलप्रदम् ।।
अचिरात् कार्य सिद्धिं च लभतेनात्र संशयः ।।११२ ।।
एककालं द्विकालं च त्रिकाले यः पठेन्नरः ।।
लक्ष्मी प्राप्तिः शिवावासं शिवेन सहमोदते ।।११३ ।।
कोटिजन्मकृतं पापं स च तेन विनश्यति ।।
सप्तजन्मकृतं पापं श्रवणेन विनश्यति ।।११४ ।।
जन्मान्तरकृतं पापं पठनेन विनश्यति ।।
दिवारात्रिकृतं पापं दर्शनेन विनश्यति ।।११५ ।।
क्षणे क्षणे कृतं पापं स्मरणेन विनश्यति ।।
पुस्तकं धारयेद् देही आरोग्यं दुःख नाशनम् ।।११६ ।।

।। शिवार्पणमस्तु ।।

इसके बाद हाथ में जलाक्षतादि लेकर बोलें :-

अनेन अष्टोत्तरशत बिल्वपत्रार्पण कर्मणा साम्बसदाशिवदेवता प्रीयताम् न मम ।।

भूयसी दक्षिणादानं –

ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य......... गोत्र. .... शर्माऽहं अष्टोतरशत बिल्वपत्रार्चने साङ्गोपाङ्गफलावाप्तये मनसोपकल्पित द्रव्यदक्षिणां नानानाम् गोत्रेभ्यो ब्राह्मणेभ्यो पृथक् पृथक् दातुं अहं उत्सृजे।

।। ॐ साम्बसदाशिवाय नमः ।।

परिशिष्ट-८

अथ रुद्रयागहवनमन्त्राः

एकषट्युत्तरशतधाविभागपक्षमाश्रित्य

रुद्रस्वाहाकारविधिः

ॐ गणानान्त्वा० स्वाहा।

ॐ अम्बेऽ अम्बिके० स्वाहा। इति हुत्वा,

ॐ यज्जाग्रतः० (६ मन्त्राः) स्वाहा।

ॐ सहस्रशीर्षा० (१६ मन्त्राः) स्वाहा।

ॐ अद्भ्यः सम्भृतः० (६ मन्त्राः) स्वाहा।

ॐ आशुः शिशानः० (१२ मन्त्राः) स्वाहा।

ॐ विब्भ्राड् बृहत्पिबतु० (१७ मन्त्राः) स्वाहा।

ॐ भूः, ॐ भुवः, ॐ स्वः, ॐ नमस्ते रुद्द्र मन्न्यवऽ उतो तऽ इषवे नमः। बाहुब्भ्यामुत ते नमः स्वाहा।।१।।

ॐ या ते रुद्द्र शिवा तनूरघोरापापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि स्वाहा।।२।।

ॐ यामिषुङ्गिरिशन्त हस्ते विभर्ष्यस्तवे। शिवाङ्गिरित्र ताङ्कुरु मा हिꣳसीः पुरुषञ्जगत् स्वाहा।।३।।

ॐ शिवेन व्वचसा त्त्वा गिरिशाच्छा व्वदामसि। यथा नः सर्व्वमिज्जगदयक्ष्मꣳसमुनाऽ असत् स्वाहा।।४।।

ॐ अद्ध्यवोचदधिवक्ता प्रथमो दैव्व्यो भिषक् । अहींश्च सर्व्वाञ्जम्भ पन्त्सर्व्वाश्च्च यातुधान्न्योऽधराचीः परासुव स्वाहा ।।५।।

ॐ असौ यस्ताम्म्रोऽ अरूणऽउत बब्भ्रुः समुङ्गलः । ये चैनঁ रुद्राऽ अभितो दिक्षु श्रिताः सहस्रशो वैषाঁ हेडऽ ईमहे स्वाहा ।।६ ।।

ॐ असौ योऽवसर्प्पति नीलग्ग्रीवो व्विलोहितः । उतैनङ्गोपाऽ अदृश्श्रन्न दृश्श्रन्नुदहार्य्यः सः दृष्ट्टो मृडयाति नः स्वाहा ।।७।।

ॐ नमोऽस्तु नीलग्ग्रीवाय सहस्राक्षाय मीढुषे । अथो येऽ अस्य सत्त्वानो हन्तेब्भ्योऽकरन्नमः स्वाहा ।।८।।

ॐ प्रमुञ्च धन्न्वनस्त्वमुभयोरात्त्न्योंर्ज्ज्याम् । याश्च्च ते हस्तऽ इषवः परा ता भगवो व्वप स्वाहा ।।९।।

ॐ व्विज्ज्यन्धनुः कपर्द्दिनो व्विशल्ल्यो बाणवाँ२ऽ उत । अने शन्नस्य याऽ इषवऽ आभुरस्य निषङ्गधिः स्वाहा ।।१०।।

ॐ या ते हेतिर्म्मीढुष्ट्टम हस्ते बभूव ते धनुः । तयास्म्मान्न्विश्श्वतस्त्व मयक्ष्यमया परिभुज स्वाहा ।।११।।

ॐ परि ते धन्न्वनो हेतिरस्मान्न्वृणक्तु व्विश्श्वतः । अथो यऽ इषुधिस्त वारेऽ अस्मन्निधेहि तम् स्वाहा ।।१२।।

ॐ अवतत्त्य धनुष्ट्वঁ सहस्राक्ष शतेषुधे । निशीर्य्य शल्ल्यानां मुखा शिवो नः सुमना भव स्वाहा ।।१३।।

ॐ नमस्त ऽ आयुधायानातताय धृष्ण्णवे। उभाब्भ्यामुत
ते नमो बाहुब्भ्यान्तव धन्न्वने स्वाहा।।१४।।

ॐ मा नो महान्तमुत मा नोऽ अर्ब्भकम्मा नऽ उक्षन्तमुत
मा नऽ उक्षितम्। मा नो व्वधीः पितरम्मोत मातरम्मा
नः प्प्रियास्तन्न्वो रुद्द्र रीरिषः स्वाहा।।१५।।

ॐ मा नस्तोके तनये मा नऽ आयुषि मा नो गोषु मा
नोऽ अश्श्वेषु रीरिषः। मा नो व्वीरान् रुद्द्र भामिनो
व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे स्वाहा।।१६।।

ॐ नमो हिरण्ण्यबाहवे सेनान्न्ये दिशाञ्च पतये नमः स्वाहा।।१७।।

ॐ नमो व्वृक्षेब्भ्यो हरिकेशेब्भ्यः पशूनाम्पतये नमः स्वाहा।।१८।।

ॐ नमः शष्पिञ्जराय त्त्विषीमते पथीनाम्पतये नमः स्वाहा।।१९।।

ॐ नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमः स्वाहा।।२०।।

ॐ नमो बब्भ्लुशाय व्वयाधिनेन्नानाम्पतये नमः स्वाहा।।२१।।

ॐ नमो भवस्य हेत्त्यै जगताम्पतये नमः स्वाहा।।२२।।

ॐ नमो रुद्द्रायाततायिने क्षेत्राणाम्पतये नमः स्वाहा।।२३।।

ॐ नमः सूतायाहन्त्यै व्वनानाम्पतये नमः स्वाहा।।२४।।

ॐ नमो रोहिताय स्थपतये व्वृक्षाणाम्पतये नमः स्वाहा।।२५।।

ॐ नमो भुवन्तये व्वारिवस्कृतायौषधीनाम्पतये नमः स्वाहा।।२६।।

ॐ नमो मन्त्रिणे व्वाणिजाय कक्षाणाम्पतये नमः स्वाहा।।२७।।

ॐ नमऽ उच्चैर्ग्घोषायाक्क्रन्दयते पत्तीनाम्पतये नमः स्वाहा।।२८।।

ॐ नमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमः स्वाहा ।।२९।।

ॐ नमः सहमानाय निव्याधिनऽ आव्याधिनीनाम्पतये नमः स्वाहा ।।३०।।

ॐ नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमः स्वाहा ।।३१।।

ॐ नमो निचेरवे परिचरायारण्ण्यानाम्पतये नमः स्वाहा ।।३२।।

ॐ नमो व्वञ्चते परिवञ्चते स्तायूनाम्पतये नमः स्वाहा ।।३३।।

ॐ नमो निषङ्गिणऽ इषुधिमते तस्कराणाम्पतये नमः स्वाहा ।।३४।।

ॐ नमः सृकायिब्भ्यो जिघा सद्भ्यो मुष्णताम्पये नमः स्वाहा ।।३५।।

ॐ नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो व्विकृन्तानाम्पतये नमः स्वाहा ।।३६।।

ॐ नमऽ उष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमः स्वाहा ।।३७।।

ॐ नमऽ इषुमद्भ्यो धन्वायिब्भ्यश्च वो नमः स्वाहा ।।३८।।

ॐ नमऽ आतन्वानेब्भ्यः प्रतिदधानेब्भ्यश्च्च वो नमः स्वाहा ।।३९।।

ॐ नमऽ आयच्छद्भ्योऽस्यद्भ्यश्च्च वो नमः स्वाहा ।।४०।।

ॐ नमो व्विसृजद्भ्यो व्विद्ध्यद्भ्यश्च्च वो नमः स्वाहा ।।४१।।

ॐ नमः स्वपद्भ्यो जाग्रद्भ्यश्च्च वो नमः स्वाहा ।।४२।।

ॐ नमः शयानेब्भ्यऽ आसीनेब्भ्यश्च वो नमः स्वाहा ।।४३।।

ॐ नमस्तिष्ठद्भ्यो धावद्भ्यश्च्च वो नमः स्वाहा ।।४४।।

ॐ नमः सभाब्भ्यः सभापतिब्भ्यश्च्च वो नमः स्वाहा ।।४५।।

ॐ नमोऽश्श्वेब्भ्योऽश्श्वपतिब्भ्यश्च्च वो नमः स्वाहा ।।४६।।

ॐ नमऽ आव्वयाधिनीब्भ्यो व्विविद्ध्यन्तीब्भ्यश्च्च वो नमः स्वाहा ।।४७।।

ॐ नमऽ उगणाब्भ्यस्तृ ँ हतीब्भ्यश्च्च वो नमः स्वाहा।।४८।।

ॐ नमो गणेभ्यो गणपतिब्भ्यश्च्च वो नमः स्वाहा।।४६।।

ॐ नमो व्व्रातेब्भ्यो व्व्रातपतिब्भ्यश्च्च वो नमः स्वाहा।।५०।।

ॐ नमो गृत्सेब्भ्यो गृत्सपतिब्भ्यश्च्च वो नमः स्वाहा।।५१।।

ॐ नमो व्विरूपेब्भ्यो व्विश्श्वरूपेब्भ्यश्च्च वो नमः स्वाहा।।५२।।

ॐ नमः सेनाब्भ्यः सेनानिब्भ्यश्च्च वो नमः स्वाहा।।५३।।

ॐ नमो रथिब्भ्योऽ अरथेब्भ्यश्च्च वो नमः स्वाहा।।५४।।

ॐ नमः क्षत्तृब्भ्यः सङ्ग्रहीतृब्भ्यश्च्च वो नमः स्वाहा।।५५।।

ॐ नमो महद्ब्भ्योऽ अर्ब्भकेब्भ्यश्च्च वो नमः स्वाहा।।५६।।

ॐ नमस्तक्षब्भ्यो रथकारेब्भ्यश्च्च वो नमः स्वाहा।।५७।।

ॐ नमः कुलालेब्भ्यः कर्म्मारेब्भ्यश्च्च वो नमः स्वाहा।।५८।।

ॐ नमो निषादेब्भ्यः पुञ्जिष्ठेब्भ्यश्च्च वो नमः स्वाहा।।५६।।

ॐ नमः श्श्वनिब्भ्यो मृगयुब्भ्यश्च्च वो नमः स्वाहा।।६०।।

ॐ नमः श्श्वब्भ्यः श्श्वपतिब्भ्यश्च्च वो नमः स्वाहा।।६१।।

ॐ नमो भवाय च रुद्द्राय च स्वाहा।।६२।।

ॐ नमः शर्व्वाय च पशुपतये च स्वाहा।।६३।।

ॐ नमो नीलग्ग्रीवाय च शितिकण्ठाय च स्वाहा।।६४।।

ॐ नमः कपर्द्दिने च व्युप्तकेशाय च स्वाहा।।६५।।

ॐ नमः सहस्राक्षाय च शतधन्वने च स्वाहा।।६६।।

ॐ नमो गिरिशयाय च शिपिविष्टाय च स्वाहा।।६७।।

ॐ नमो मीढुष्टमाय चेषुमते च स्वाहा।।६८।।

ॐ नमो ह्रस्वाय च व्वामनाय च स्वाहा।।६९।।

ॐ नमो बृहते च व्वर्षीयसे च स्वाहा।।७०।।

ॐ नमो व्वृद्धाय च सवृधे च स्वाहा।।७१।।

ॐ नमोऽग्रयाय च प्प्रथमाय च स्वाहा।।७२।।

ॐ नमऽ आशवे चाजिराय च स्वाहा।।७३।।

ॐ नमः शीग्घ्याय च शीब्भ्याय च स्वाहा।।७४।।

ॐ नमऽ ऊर्म्म्याय चावस्वन्न्याय च स्वाहा।।७५।।

ॐ नमो नादेयाय च द्वीप्पयाय च स्वाहा।।७६।।

ॐ नमो ज्ज्येष्ठाय च कनिष्ठाय च स्वाहा।।७७।।

ॐ नमः पूर्व्वजाय चापरजाय च स्वाहा।।७८।।

ॐ नमो मद्ध्यमाय चापगल्भाय च स्वाहा।।७९।।

ॐ नमो जघन्न्याय च बुद्ध्न्याय च स्वाहा।।८०।।

ॐ नमः सोब्भ्याय च प्रतिसर्य्याय च स्वाहा।।८१।।

ॐ नमो याम्म्याय च क्षेम्म्याय च स्वाहा।।८२।।

ॐ नमः श्श्लोक्क्याय चावसान्न्याय च स्वाहा।।८३।।

ॐ नमऽ उर्व्वर्य्याय च खल्ल्याय च स्वाहा।।८४।।

ॐ नमो व्वन्न्याय च क्कक्ष्याय च स्वाहा।।८५।।

ॐ नमः श्श्रवाय च प्रतिश्श्रवाय च स्वाहा।।८६।।

ॐ नमऽ आशुषेणाय चाशुरथाय च स्वाहा।।८७।।

ॐ नमः शूराय चावभेदिने च स्वाहा।।८८।।

ॐ नमो बिल्मिने च कवचिने च स्वाहा।।८९।।

ॐ नमो व्वर्म्मिणे च व्वरूथिने च स्वाहा।।९०।।

ॐ नमः श्श्रुताय च श्श्रुतसेनाय च स्वाहा।।९१।।

ॐ नमो दुन्दुब्भ्याय चाहनन्न्याय च स्वाहा।।९२।।

ॐ नमो धृष्ष्णवे च प्रमृशाय च स्वाहा।।९३।।

ॐ नमो निषङ्गिणे चेषुधिमते च स्वाहा।।९४।।

ॐ नमस्तीक्ष्णेषवे चायुधिने च स्वाहा।।९५।।

ॐ नमः स्वायुधाय च सुधन्न्वने च स्वाहा।।९६।।

ॐ नमः स्स्रुत्याय च पत्थ्याय च स्वाहा।।९७।।

ॐ नमः काट्टयाय च नीप्प्याय च स्वाहा।।९८।।

ॐ नमः कुल्ल्याय च सरस्याय च स्वाहा।।९९।।

ॐ नमो नादेयाय च व्वैशन्ताय च स्वाहा।।१००।।

ॐ नमः कूप्प्याय चावट्टयाय च स्वाहा।।१०१।।

ॐ नमो व्वीद्ध्रयाय चातप्प्याय च स्वाहा।।१०२।।

ॐ नमो मेग्घ्याय च व्विद्युत्त्याय च स्वाहा।।१०३।।

ॐ नमो व्वर्ष्र्याय चावर्ष्र्याय च स्वाहा।।१०४।।

ॐ नमो व्वात्त्याय च रेष्म्म्याय च स्वाहा।।१०५।।
ॐ नमो व्वास्तव्वयाय च व्वास्तुपाय च स्वाहा।।१०६।।
ॐ नमः सोमाय च रुद्द्राय च स्वाहा।।१०७।।
ॐ नमस्ताम्म्राय चारुणाय च स्वाहा।।१०८।।
ॐ नमः शङ्गवे च पशुपतये च स्वाहा।।१०६।।
ॐ नमऽ उग्ग्राय च भीमाय च स्वाहा।।११०।।
ॐ नमोऽग्ग्रेवधाय च दूरेवधाय च स्वाहा।।१११।।
ॐ नमो हन्त्रे च हनीयसे च स्वाहा।।११२।।
ॐ नमो व्वृक्षेब्भ्यो हरिकेशेब्भ्यः स्वाहा।।११३।।
ॐ नमस्ताराय स्वाहा।।११४।।
ॐ नमः शम्भवाय च मयोभवाय च स्वाहा।।११५।।
ॐ नमः शङ्कराय च मयस्कराय च स्वाहा।।११६।।
ॐ नमः शिवाय च शिवतराय च स्वाहा।।११७।।
ॐ नमः पार्य्याय चावार्य्याय च स्वाहा।।११८।।
ॐ नमः प्रतरणाय चोत्तरणाय च स्वाहा।।११६।।
ॐ नमस्तीर्त्थ्याय च कूल्ल्याय च स्वाहा।।१२०।।
ॐ नमः शष्प्याय च फेन्न्याय च स्वाहा।।१२१।।
ॐ नमः सिकत्त्याय च प्रवाह्याय च स्वाहा।।१२२।।
ॐ नमः कीᳪ शिलाय च क्षयणाय च स्वाहा।।१२३।।
ॐ नमः कपर्द्दिने च पुलस्तये च स्वाहा।।१२४।।

ॐ नमऽ इरिण्ण्याय च प्रपत्थ्याय च स्वाहा ।।१२५।।
ॐ नमो व्व्रज्ज्याय च गोष्ठ्याय च स्वाहा ।।१२६।।
ॐ नमस्तल्प्याय च गेह्याय च स्वाहा ।।१२७।।
ॐ नमो हृदय्याय च निवेष्प्याय च स्वाहा ।।१२८।।
ॐ नमः काट्टयाय च गह्वरेष्ठाय च स्वाहा ।।१२९।।
ॐ नमः शुष्क्क्याय च हरित्त्याय च स्वाहा ।।१३०।।
ॐ नमः पाᳫंसव्व्याय च रजस्याय च स्वाहा ।।१३१।।
ॐ नमो लोप्प्याय चोलप्प्याय च स्वाहा ।।१३२।।
ॐ नमऽ ऊर्व्व्याय च सूर्व्व्याय च स्वाहा ।।१३३।।
ॐ नमः पर्ण्णाय च पर्ण्णशदाय च स्वाहा ।।१३४।।
ॐ नमऽ उद्गुरमाणाय चाभिग्घ्नते च स्वाहा ।।१३५।।
ॐ नमऽ आखिदते च प्रखिदते च स्वाहा ।।१३६।।
ॐ नमऽ इषुकृद्भ्भ्यो धनुष्कृद्भ्भ्यश्च्च वो नमः स्वाहा ।।१३७।।
ॐ नमो वः किरिकेब्भ्यो देवान[illegible]भ्यः स्वाहा ।।१३८।।
ॐ नमो व्विचिन्न्वकेब्भ्यो देवानाᳫं हृदयेब्भ्यः स्वाहा ।।१३९।।
ॐ नमो व्विक्षिणत्केब्भ्यो देवानाᳫं हृदयेब्भ्यः स्वाहा ।।१४०।।
ॐ नमो आनिर्हतेब्भ्यो देवानाᳫं हृदयेब्भ्यः स्वाहा ।।१४१।।
ॐ द्रापेऽ अन्धसस्प्पते दरिद्र नीललोहिताय । आसाम्प्रजाना
मेषाम्पशू नाम्मभेर्म्मा रोङ्‌ मो च नः किञ्चनाममत्
स्वाहा ।।१४२।।

ॐ इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा शमसद् द्विपदे चतुष्पदे विश्श्वम्पुष्टं ग्रामे ऽ अस्मिन्ननातुरम् स्वाहा।।१४३।।

ॐ या ते रुद्र शिवा तनूः शिवा विश्श्वाहा भेषजी। शिवा रुतस्य भेषजी तया नो मृढ जीवसे स्वाहा।।१४४।।

ॐ परि नो रुद्रस्य हेतिर्व्वृणक्तु परि त्वेषस्य दुर्म्मतिरधा योः। अव स्त्थिरा मधवद्ब्भ्यस्तनुष्ष्व मीड्ढ्वस्तोकाय तनयाय मृड स्वाहा।।१४५।।

ॐ मीढुष्टम शिवतम शिवो नः सुमना भव। परमे व्वृक्ष ऽ आयुधन्निधाय कृतिं व्वसान ऽ आचर पिनाकम्बि-भ्रदागहि स्वाहा।।१४६।।

ॐ व्विकिरिद्द्र व्विलोहित नमस्ते ऽ अस्तु भगवः। यास्ते सहस्र७ँ हेतयो ऽन्न्यमस्म्मन्निवपन्तु ताः स्वाहा।।१४७।।

ॐ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखा कृधि स्वाहा।।१४८।।

ॐ असङ्ख्याता सहस्राणि ये रुद्रा ऽ अधि भूम्म्याम्। तेषा७ँ सहस्रयोजने ऽव धन्न्वानि तन्न्मसि स्वाहा।।१४९।।

ॐ अस्म्मिन्न्महत्यर्ण्णवे ऽन्तरिक्षे भवा ऽ अधि। तेषा७ँ सहस्रयोजने ऽव धन्न्वानि तन्न्मसि स्वाहा।।१५०।।

ॐ नीलग्ग्रीवाः शितिकण्ठाः दिव७ँ रुद्द्रा ऽ उपश्श्रिताः। तेषा७ँ सहस्रयोजने ऽव धन्न्वानि तन्न्मसि स्वाहा।।१५१।।

ॐ नीलग्ग्रीवाः शितिकण्ठाः शर्व्वाऽ अधः क्षमाचराः ।
तेषा॑ᳪ सहस्रयोजनेऽव धन्न्वानि तन्मसि स्वाहा ।।१५२।।

ॐ ये व्वृक्षेषु शष्प्पिञ्जरा नीलग्ग्रीवाः व्विलोहिताः ।
तेषा॑ᳪ सहस्रयोजनेऽव धन्न्वानि तन्मसि स्वाहा ।।१५३।।

ॐ ये भूतानामधिपतयो व्विशिखासः कपर्द्दिन ।
तेषा॑ᳪ सहस्रयोजनेऽव धन्न्वानि तन्मसि स्वाहा ।।१५४।।

ॐ ये पथाम्पथिरक्षयऽ ऐलवृदाऽ आयुर्य्युधः ।
तेषा॑ᳪ सहस्रयोजनेऽव धन्न्वानि तन्मसि स्वाहा ।।१५५।।

ॐ ये तीर्त्थानि प्प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषा॑ᳪ सहस्रयोजनेऽव धन्न्वानि तन्मसि स्वाहा ।।१५६।।

ॐ येऽन्नेषु व्विविद्ध्यन्ति पात्रेषु पिबतो जनान् ।
तेषा॑ᳪ सहस्रयोजनेऽव धन्न्वानि तन्मसि स्वाहा ।।१५७।।

ॐ यऽ एतावन्तश्श्च भूयाकसश्च्च दिशोरुद्द्रा व्वितस्त्थिरे ।
तेषा॑ᳪ सहस्रयोजनेऽव धन्न्वानि तन्मसि स्वाहा ।।१५८।।

ॐ नमोऽस्तु रुद्द्रेब्भ्यो ये दिवि येषां व्वर्षमिषवः । तेब्भ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदीचीर्द्दशोद्र्ध्वाः ।। तेब्भ्यो नमोऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्ष्मो यश्च्च नो द्वेष्ष्टि तमेषाञ्जम्भे दद्ध्मः स्वाहा ।।१५९।।

ॐ नमोऽस्तु रुद्द्रेब्भ्यो येऽन्तरिक्षे येषां व्वातऽ इषवः । तेब्भ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदीचीर्द्दशोद्र्ध्वाः ।। तेब्भ्यो नमोऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्ष्मो यश्च्च नो द्वेष्ष्टि तमेषाञ्जम्भे दद्ध्मः स्वाहा ।।१६०।।

ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः। तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।। तेभ्यो नमोऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः स्वाहा।।१६१।।

ॐ भूः, ॐ भूवः, ॐ स्वः, ॐ व्वय७ँ सोम० (८ मन्त्राः) (पाठमात्रम्)।

ॐ उग्रश्च० (७ मन्त्राः) (पाठमात्रम्)।

ॐ व्वाजश्च०।।१।। प्राणश्च०।।२।। ओजश्च०।।३।। ज्यैष्ठ्यं च०।।४।। स्वाहा।

२–ॐ नमस्ते० (१६१ आहुतयः)।

ॐ सत्यञ्च०।।१।। ऋतञ्च०।।२।। यन्ता च०।।३।। शञ्च०।।४।। स्वाहा।

३–ॐ नमस्ते० (१६१ आहुतयः)।

ॐ ऊर्क् च०।।१।। रयिश्च०।।२।। वित्तञ्च०।।३।। व्व्रीहयश्च०।।४।। स्वाहा।

४–ॐ नमस्ते० (१६१ आहुतयः)।

ॐ अश्मा च०।।१।। अग्निश्च०।।२।। व्वसु च०।।३।। स्वाहा।

५–ॐ नमस्ते० (१६१ आहुतयः)।

ॐ अग्निश्च मऽ इन्द्रश्च०।।१।। मित्रश्च०।।२।। पृथिवी च०।।३।। स्वाहा।

६–ॐ नमस्ते० (१६१ आहुतयः)।
ॐ अ॰ शुश्च०।।१।।आग्रयणश्च०।।२।।स्रुचश्च०।।३।। स्वाहा।

७–ॐ नमस्ते० (१६१ आहुतयः)।
ॐ अग्निश्च०।।१।।व्रतञ्च०।।२।।स्वाहा।

८–ॐ नमस्ते० (१६१ आहुतयः)।
ॐ एका च०।।१।।स्वाहा।

९–ॐ नमस्ते० (१६१ आहुतयः)।
ॐ चतस्रश्च०।।१।।स्वाहा।

१०–ॐ नमस्ते० (१६१ आहुतयः)।
ॐ त्र्यविश्च०।।१।।पष्ठवाट् च०।।२।।स्वाहा।

(पुनः) ॐ यज्जाग्रतः० (६ मन्त्राः) स्वाहा।
ॐ सहस्रशीर्षा० (१६ मन्त्राः) स्वाहा।
ॐ अद्भ्यः सम्भृतः० (६ मन्त्राः) स्वाहा।
ॐ आशुः शिशानः० (१२ मन्त्राः) स्वाहा।
ॐ विभ्राड् बृहत् पिबतु० (१७ मन्त्राः) स्वाहा।

११–ॐ नमस्ते० (१६१ आहुतयः)।
ॐ व्वाजाय स्वाहा०।।१।।आयुर्य्यज्ञेन कल्पताम्०।।२।। स्वाहा। ॐ ऋचं वाचम्० स्वाहा। ॐ यन्मे छिद्रम्० स्वाहा। ॐ भूर्भुवः स्वः तत्सवितुः० स्वाहा। ॐ कयानश्चित्रः० स्वाहा। ॐ कस्त्वा सत्यो मदानाम्. स्वाहा। ॐ अभी षु णः० स्वाहा।

ॐ कया त्वन्न ऽ ऊत्याभिः स्वाहा । ॐ इन्द्रो व्विश्वस्य० स्वाहा । ॐ शं नो मित्रः शं वरुणः स्वाहा । ॐ शं नो व्वातः पवता ँ शं नः० स्वाहा । ॐ अहानि शं भवन्तु नः० स्वाहा । ॐ शन्नो देवीः० स्वाहा । ॐ स्योना पृथिवि० स्वाहा । ॐ आपो हि ष्ठा० स्वाहा । ॐ यो वः शिवतमो रसः० स्वाहा । ॐ तस्मा ऽ अरं गमाम वः० स्वाहा । ॐ द्यौः शान्तिः० स्वाहा । ॐ दृते दृ ँ ह मा मित्रस्य मा चक्षुषा० स्वाहा । ॐ दृते दृ ँ ह मा ज्योक्ते० स्वाहा । ॐ नमस्ते हरसे शोचिषे० स्वाहा । ॐ नमस्ते ऽ अस्तु व्विद्युते० स्वाहा । ॐ यतो यतः समीहसे० स्वाहा । ॐ सुमित्रिया न ऽ आपः० स्वाहा । ॐ तच्चक्षुर्द्देवहितम्० स्वाहा । ॐ सद्योजातम्० (५ मन्त्राः) (पाठमात्रम्) ।

ततः षडङ्गन्यासं कुर्यादिति ।

इति रुद्रयागहवनमन्त्राः ।।

(१) अथ रुद्रयागस्य षड्भिः प्रकारैर्हवनमन्त्रविभागस्तत्र एकधाहवनमन्त्रविभागपक्षः प्रथमः ।

ॐ नमस्ते रुद्र मन्यव इत्यारभ्य तमेषाञ्जम्भे दध्मः स्वाहा ।।

इति षट्षष्ठिमन्त्राणामेकाहुतिः ।।१ ।।

(२) अथ त्रेधाहवनमन्त्रविभागपक्षः द्वितीयः ।

ॐ नमस्ते रुद्र मन्यव इत्यारभ्य अर्ब्भकेब्भ्यश्च वो नमः स्वाहा ।।

इति षड्विंशतिमन्त्राणामेकाहुतिः ।।१ ।।

ॐ नमस्तक्षब्भ्य इत्यारभ्य सुधन्वने च स्वाहा ।।

इति दशमन्त्राणामेकाहुतिः ।।२ ।।

ॐ नमः स्रुत्यायेत्यारभ्य तमेषाञ्जम्भे दध्मः स्वाहा ।।

इति त्रिंशन्मन्त्राणामेकाहुतिः ।।३ ।।

(३) अथ षोढा (षडधा) हवनमन्त्रविभागपक्षस्तृतीयः।

ॐ नमस्ते रुद्र मन्यव इत्यारभ्य अर्भकेभ्यश्च वो नमः स्वाहा ।।
इति षड्विंशतिमन्त्राणामेकाहुतिः ।।१।।

ॐ नमस्तक्षभ्य इत्यारभ्य सुधन्वने च स्वाहा ।।
इति दशमन्त्राणामेकाहुतिः ।।२।।

ॐ नमः स्रुत्यायेत्यारभ्य यऽएतावन्तश्च० मसि स्वाहा ।।
इति सप्तविंशतिमन्त्राणामेकाहुतिः ।।३।।

ॐ नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः। तेभ्यो दश प्राची० तमेषाञ्जम्भे दध्मः स्वाहा ।।४।।

ॐ नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वातऽ इषवः। तेभ्यो दश प्राची० तमेषाञ्जम्भे दध्मः स्वाहा ।।५।।

ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः। तेभ्यो दश प्राची० तमेषाञ्जम्भे दध्मः स्वाहा ।।६।।

(४) अथ षोडशधा हवनमन्त्रविभागपक्षश्चतुर्थः।

ॐ नमस्ते रुद्र मन्यव इत्यारभ्य अर्भकेभ्यश्च वो नमः स्वाहा ।।
इति षड्विंशतिमन्त्राणामेकाहुतिः ।।१।।

ॐ नमस्तक्षभ्य इत्यारभ्य सुधन्वने च स्वाहा ।।
इति दशमन्त्राणामेकाहुतिः ।।२।।

ॐ नमः स्रुत्यायेत्यारभ्य पराचीना सुखा कृधि स्वाहा ।।
इति सप्तदशमन्त्राणामेकाहुतिः ।।३।।

ॐ असङ्ख्याता सहस्राणि ये रुद्राऽ अधि भूम्याम्।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ।।४।।

ॐ अस्मिन्नमहत्त्यर्णवेऽन्तरिक्षे भवाऽ अधि।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ।।५।।

ॐ नीलग्ग्रीवाः शितिकण्ठा दिव७ँ रुद्राऽ उपश्रिताः।
तेषा७ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।६।।

ॐ नीलग्ग्रीवाः शितिकण्ठा शर्व्वाऽ अधः क्षमचराः।
तेषा७ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।७।।

ॐ ये व्वृक्षेषु शष्पिञ्जरा नीलग्रीवा व्विलाहिताः।
तेषा७ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।८।।

ॐ ये भूतानामधिपतयो व्विशिखासः कपर्द्दिनः।
तेषा७ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।९।।

ॐ ये पथां पथिरक्षयऽ ऐलबृदाऽ आयुर्य्यधः।
तेषा७ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१०।।

ॐ ये तीर्त्थानि प्रचरन्ति सृकाहस्ता निषङ्गिगणः।
तेषा७ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।११।।

ॐ येऽन्नेषु व्विविद्ध्यन्ति पात्रेषु पिबतो जनान्।
तेषा७ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१२।।

ॐ यऽ एतावन्तश्च्व भूया७ँसश्श्च दिशो रुद्रा व्वितस्थिरे।
तेषा७ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१३।।

ॐ नमोऽस्तु रुद्रेब्भ्यो ये दिवि येषां व्वर्षमिषवः। तेभ्यो दश प्राचीर्द्दश०। तेभ्यो नमोऽ अस्तु तेनोऽवन्तु तेनो० तमेषां जम्भे दध्मः स्वाहा।१४।।

ॐ नमोऽस्तु रुद्रेब्भ्यो येऽन्तरिक्षे येषां व्वातऽ इषवः। तेभ्यो दश प्राचीर्द्दश०। तेभ्यो नमोऽ अस्तु तेनोऽवन्तु तेनो० तमेषां जम्भे दध्मः स्वाहा।१५।।

ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः। तेभ्यो दश प्राचीर्द्दश०। तेभ्यो नमोऽ अस्तु तेनोऽवन्तु तेनो० तमेषां जम्भे दध्मः स्वाहा।१६।।

(५) अथ चतुश्चत्वारिंशद्धवनमन्त्रविभागपक्षः पञ्चमः।

ॐ नमस्ते रुद्र मन्यव० मुत ते नमः स्वाहा।।१।।
ॐ या ते रुद्र शिवा० भि चाकशीहि स्वाहा।।२।।
ॐ यामिषुङ्गिरिशन्त० पुरुषञ्जगत् स्वाहा।।३।।
ॐ शिवेन व्वचसा० सुमनाऽ असत् स्वाहा।।४।।
ॐ अद्ध्यवोचदधिवक्ता० परासुव स्वाहा।।५।।
ॐ असौ यस्ताम्रो० ईमहे स्वाहा।।६।।
ॐ असौ योऽवसर्प्पति० उतैनं गोपा० मृडयाति नः स्वाहा।।७।।
ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय० तेभ्योऽकरन्नमःस्वाहा।।८।।
ॐ प्रमुञ्च धन्वनस्त्वमुभयो० भगवो व्वप स्वाहा।।६।।
ॐ व्विज्ज्यं धनुः कपर्द्दिनो० निषङ्गधिः स्वाहा।।१०।।
ॐ या ते हेतिर्म्मीढुष्टम हस्ते० परिभुज स्वाहा।।११।।
ॐ परि ते धन्वनो हेति० निधेहि तम् स्वाहा।।१२।।
ॐ अवतत्य धनुष्ट्वꣳ सहस्राक्ष० सुमना भव स्वाहा।।१३।।
ॐ नमस्तऽ आयुधाया० धन्वने स्वाहा।।१४।।
ॐ मा नो महान्तमुत० रीरिषः स्वाहा।।१५।।
ॐ मा नस्तोके० हवामहे स्वाहा।।१६।।
ॐ नमो हिरण्यबाहवे० स्वाहा। ॐ नमो बभ्लुशाय०। ॐ नमो रोहिताय० स्वाहा। ॐ नमः कृत्स्नायतया० स्वाहा। ॐ नमो व्वञ्चते व्विकृन्तानाम्पतये नमः स्वाहा। इति पञ्चमन्त्राणामेकाहुतिः।।१७।।

ॐ नमो उष्णीषिणे० स्वाहा। ॐ नमो व्विसृजद्भ्यो० स्वाहा।
ॐ नमः सभाभ्यः० स्वाहा। ॐ नमो गणेभ्यो० स्वाहा।
ॐ नमः सेनाभ्यः० अर्भकेभ्यश्च वो नमः स्वाहा।
इति पञ्चमन्त्राणामेकाहुतिः।।१८।।

ॐ नमस्तक्षभ्यो० स्वाहा। ॐ नमः श्वभ्यः० स्वाहा।
ॐ नमः कपर्द्दिने० स्वाहा। ॐ नमो ह्रस्वाय० स्वाहा।
ॐ नमऽ आशवे० स्वाहा।
इति पञ्चमन्त्राणामेकाहुतिः।।१९।।

ॐ नमो ज्ज्येष्ठाय० स्वाहा। ॐ नमः सोभ्यायः० स्वाहा।
ॐ नमो व्वन्न्याय० स्वाहा। ॐ नमो बिल्मिने० स्वाहा।
ॐ नमो धृष्णवे०
इति पञ्चमन्त्राणामेकाहुतिः।।२०।।

ॐ नमः स्रुत्याय० स्वाहा। ॐ नमः कृप्याय० स्वाहा। ॐ नमो व्वात्याय० स्वाहा। ॐ नमः शङ्गवे नमस्ताराय स्वाहा।
इति मन्त्रचतुष्टयस्यैकाहुतिः।।२१।।

ॐ नमः शम्भवाय० शिवतराय च स्वाहा।।२२।।

ॐ नमः पार्य्याय० स्वाहा। ॐ नमः सिकत्याय० स्वाहा।
ॐ नमो व्व्रज्ज्याय० स्वाहा। ॐ नमः शुष्क्याय० स्वाहा। ॐ नमः पर्ण्णाय० आनिर्हतेभ्यः स्वाहा।
इति पञ्चमन्त्राणामेकाहुतिः।।२३।।

ॐ नमो वः किरिकेभ्यो देवानाᳬ हृदयेभ्यो नमो व्विचिन्नवत्केभ्यो नमो व्विक्षिणत्केत्यो नमऽ आनिर्हतेभ्यः स्वाहा।।२४।।

ॐ द्रापेऽ अन्धसस्पते० किं चनाममत् स्वाहा।।२५।।

ॐ इमा रुद्राय तवसे० अस्मिन्ननातुरम् स्वाहा।।२६।।

ॐ या ते रुद्र शिवा तनूः शिवा० मृड जीवसे स्वाहा।।२७।।

ॐ परि नो रुद्रस्य० तनयाय मृड स्वाहा।।२८।।

ॐ मीढुष्टम शिवतम० बिभ्रदा गहि स्वाहा।।२९।।
ॐ व्विकिरिद्द व्विलोहित० विपन्तु ताः स्वाहा।।३०।।
ॐ सहस्राणि सहस्रशो० मुखा कृधि स्वाहा।।३१।।
ॐ असङ्ख्याता सहस्राणि० तन्न्मसि स्वाहा।।३२।।
ॐ अस्म्मिन्न्महत्यर्णवे० तन्न्मसि स्वाहा।।३३।।
ॐ नीलग्ग्रीवाः शितिकण्ठाः दिवᳬ रुद्द्रा० तन्न्मसि स्वाहा।।३४।।
ॐ नीलग्ग्रीवाः शितिकण्ठाः शर्व्वाऽ अधः० तन्न्मसि स्वाहा।।३५।।
ॐ ये व्वृक्षेषु० तन्न्मसि स्वाहा।।३६।।
ॐ ये भूतानामधिपतयो० तन्न्मसि स्वाहा।।३७।।
ॐ ये पथाम्पथिरक्षयऽ ऐल० तन्न्मसि स्वाहा।।३८।।
ॐ ये तीर्त्थानि० तन्न्मसि स्वाहा।।३९।।
ॐ येऽन्नेषु० तन्न्मसि स्वाहा।।४०।।
ॐ यऽ एतावन्तश्च० तन्न्मसि स्वाहा।।४१।।
ॐ नमोऽस्तु रुद्द्रेब्भ्यो ये दिवि० जम्भे दध्मः स्वाहा।।४२।।
ॐ नमोऽस्तु रुद्द्रेब्भ्यो येऽन्तरिक्षे० जम्भे दध्मः स्वाहा।।४३।।
ॐ नमोऽस्तु रुद्द्रेब्भ्यो ये पृथिव्यां येषामन्न०जम्भे दध्मः स्वाहा।।४४।।

(६) अथाष्टचत्वारिंशद्धवनमन्त्रविभागपक्षः षष्ठः।

ॐ नमस्ते रुद्द्र मन्यव० मुतते नमः स्वाहा।।१।।
ॐ या ते रुद्द्र शिवा० भि चाकशीहि स्वाहा।।२।।
ॐ यामिषुङ्गिरिशन्त० पुरुषञ्जगत् स्वाहा।।३।।
ॐ शिवेन व्वचसा त्वा गिरिशाच्छा० सुमनाऽ असत् स्वाहा।।४।।

ॐ अध्यवोचदधिवक्ता० परासुव स्वाहा।।५।।

ॐ असौ यस्ताम्रोऽ अरुणः० ईमहे स्वाहा।।६।।

ॐ असौ योऽवसर्प्पति०उतैनं गोपा०मृडयाति नः स्वाहा।।७।।

ॐ नमोऽस्तु नीलग्ग्रीवाय सहस्राक्षाय मीढुसे० करन्नमःस्वाहा।।८।।

ॐ प्रमुञ्च धन्वनस्त्वमुभयोरात्र्योर्ज्ज्याम्० भगवो व्वप स्वाहा।।९।।

ॐ व्विज्ज्यन्धनुः कपर्द्दिनो० निषङ्गधिः स्वाहा।।१०।।

ॐ या ते हेतिर्म्मीढुष्ट्टम हस्ते० परिभुज स्वाहा।।११।।

ॐ परि ते धन्वनो हेतिरस्मान्वृणक्त० निधेहितं स्वाहा।।१२।।

ॐ अवतत्त्य धनुष्ट्व ँ सहस्राक्ष शतेषुधे० सुमना भव स्वाहा।।१३।।

ॐ नमस्तऽ आयुधायाना० धन्वने स्वाहा।।१४।।

ॐ मा नो महान्तमुत० रुद्र रीरिषः स्वाहा।।१५।।

ॐ मा नस्तोके तनये मा नऽ आयुषि० सद्मित्त्वा हवामहे स्वाहा।।१६।।

ॐ नमो हिरण्ण्यबाहवे० स्वाहा। ॐ नमो बब्भ्लुशाय० स्वाहा।
ॐ नमो रोहिताय० स्वाहा। ॐ नमः कृत्स्नायतया० स्वाहा।
ॐ नमो व्वञ्चते परिवञ्चते० व्विकृन्तानां पतये नमः स्वाहा।
इति पञ्चमन्त्राणामेकाहुतिः।।१७।।

ॐ नमो उष्णीषिणे गिरिचराय० स्वाहा। ॐ नमो व्विसृजद्भ्यो
व्विध्यद्भ्यश्च० स्वाहा। ॐ नमः सभाभ्यः सभा० स्वाहा।
ॐ नमो गणेभ्यो गणपतिभ्यश्च० स्वाहा। ॐ नमः सेनाभ्यः
सेनानिभ्यश्च० अर्भकेभ्यश्च वो नमः स्वाहा।
इति पञ्चमन्त्राणामेकाहुतिः।।१८।।

ॐ नमस्तक्षभ्यो रथकारेभ्यश्च० स्वाहा। ॐ नमः श्वभ्यः श्वपतिभ्यश्च० स्वाहा। ॐ नमः कपर्द्दिने च व्युप्तकेशाय० स्वाहा। ॐ नमो ह्रस्वाय च व्वामनाय० स्वाहा। ॐ नमऽ आशवे चाजिराय च० द्वीप्याय व स्वाहा।

इति पञ्चमन्त्राणामेकाहुतिः।।१९।।

ॐ नमो ज्ज्येष्ठाय च कनिष्ठाय च० स्वाहा। ॐ नमः सोभ्यायः च प्रति सर्य्याय च० स्वाहा। ॐ नमो व्वन्याय च० स्वाहा। ॐ नमो बिल्मिने च कवचिने च० स्वाहा। ॐ नमो धृष्णवे च प्रमृशाय च० सधन्नवने च स्वाहा।

इति पञ्चमन्त्राणामेकाहुतिः।।२०।।

ॐ नमः स्रुत्याय च पत्थ्याय च० स्वाहा। ॐ नमः कूप्याय चावट्याय च० स्वाहा। ॐ नमो व्वात्याय च रेष्म्याय च० स्वाहा। ॐ नमः शङ्गवे च पशुपतये च० हनीयसे च मनो व्वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय स्वाहा।

इति चतुर्मन्त्राणामेकाहुतिः।।२१।।

ॐ नमः शम्भवाय च० शिवतराय च स्वाहा।।२२।।

ॐ नमः पार्य्याय चावार्य्याय च० स्वाहा। ॐ नमः सिकत्याय प्रवाह्याय च० स्वाहा। ॐ नमो व्व्रज्ज्याय च गोष्ठ्याय च० स्वाहा। ॐ नमः शुष्क्याय च हरित्याय च० स्वाहा। ॐ नमः पर्ण्णाय च पर्ण्णशदाय च० धनुष्कृद्भ्यश्च वो नमः स्वाहा।

इति पञ्चमन्त्राणामेकाहुतिः।।२३।।

ॐ नमो वः किरिकेभ्यः स्वाहा।।२४।।

ॐ देवानाᳫ हृदयेभ्यः स्वाहा।।२५।।

ॐ नमो विचिन्वत्केभ्यः स्वाहा ।।२६ ।।
ॐ नमो विक्षिणत्केभ्यः स्वाहा ।।२७ ।।
ॐ नमऽ आनिर्हतेभ्यः स्वाहा ।।२८ ।।
ॐ द्रापेऽ अन्धसस्पते० किञ्चनाममत् स्वाहा ।।२६ ।।
ॐ इमा रुद्राय तवसे० अस्मिन्ननातुरम् स्वाहा ।।३० ।।
ॐ या ते रुद्र शिवा० मृड जीवसे स्वाहा ।।३१ ।।
ॐ परि नो रुद्रस्य० तनयाय मृड स्वाहा ।।३२ ।।
ॐ मीढुष्टम शिवतम शिवो नः० बिभ्रदा गहि स्वाहा ।।३३ ।।
ॐ विकिरिद्र० न्नि वपन्तु ताः स्वाहा ।।३४ ।।
ॐ सहस्राणि सहस्रशो० मुखा कृधि स्वाहा ।।३५ ।।
ॐ असङ्ख्याता सहस्राणि० तन्मसि स्वाहा ।।३६ ।।
ॐ अस्मिन्महत्यर्णवे० तन्मसि स्वाहा ।।३७ ।।
ॐ नीलग्रीवाः शितिकण्ठाः दिवꣳ रुद्रा० तन्मसि स्वाहा ।।३८ ।।
ॐ नीलग्रीवाः शितिकण्ठाः शर्वाऽ अधः० तन्मसि स्वाहा ।।३६ ।।
ॐ ये वृक्षेषु शष्पिञ्जरा० तन्मसि स्वाहा ।।४० ।।
ॐ ये भूतानामधिपतयो० तन्मसि स्वाहा ।।४१ ।।
ॐ ये पथां पथि० जनेऽव धन्वानि तन्मसि स्वाहा ।।४२ ।।
ॐ ये तीर्थानि प्रचरन्ति० तन्मसि स्वाहा ।।४३ ।।
ॐ येऽन्नेषु विविद्ध्यन्ति० तन्मसि स्वाहा ।।४४ ।।
ॐ यऽ एतावन्तश्च भूयाꣳसश्च० तन्मसि स्वाहा ।।४५ ।।
ॐ नमोऽस्तु रुद्रेभ्यो ये दिवि० तमेषाञ्जम्भे दध्मः स्वाहा ।।४६ ।।
ॐ नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे० तमेषाजम्भे दध्मः स्वाहा ।।४७ ।।
ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्न० तमेषां जम्भे दध्मः स्वाहा ।।४८ ।।

इति रूद्रयाग-हवनमन्त्राः ।

श्री पशुपत्यष्टकम्

ध्यानम्

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारूचन्द्रावतंसं
रत्नाकल्पोज्जवाङ्ग्ग परशुमृगवराभीतिहस्तं प्रसन्ननम्।
पद्मासीनं समन्तात्स्तुतममरगणै र्व्याघ्रकृतिं वसानं।
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।।१।।

स्त्रोतम्

पशुपतिं द्युपतिं धरणीपतिं भुजगलोकपतिं च सतीपतिम्।
प्रणतभक्तजनार्तिहिरं परं भजत रे मनुजा गिरिजापतिम्।।१।।
न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम्।
अवति कोऽपि न कालवशं गतं भजत रे मनुजा गिरिजापतिम्।।२।।
मुरजडिडिपवाद्यविलक्षणं मधुरपञ्चमनादविशारदम्।
प्रमथभूतगणैरपि सेवितं भजत रे मनुजा गिरिजापतिम्।।३।।
शरणदं सुखदं शरणान्वितं शिव शिवेति शिवेति नतं नृणाम्।
अभयदं करूणावरूणालयं भजत रे मनुजा गिरिजापतिम्।।४।।
नरशिरोरचितं मणिकुण्डलं भुजगहारमुदं वृषभध्वजम्।
चितिरजोधवलीकृतविग्रहं भजत रे मनुजा गिरिजापतिम्।।५।।
मखविनाशकरं शशिशेखरं सततमध्वरभाजि फलप्रदम्।
प्रलयदग्धसुरासुरमानवं भजत रे मनुजा गिरिजापतिम्।।६।।
मरमपास्य चिरं हृदि संस्थितं मरणजन्मजराभयपीडितम्।
जगदुदीक्ष्य समीपभयाकुलं भजत रे गिरिजापतिम्।।७।।

हरिविरञ्चिसुराधिपपूजितं यमजतेशधनेशनमस्कृतम्।
त्रिनयनं भुवनत्रितयाधिपं भजत रे मनुजा गिरिजापतिम्।।८।।
पशुपतेरिदमष्टकमद्भुतं विरचितं पृथिवीपतिसूरिणा।
पठति संश्रृणुते मनुजः सदा शिवपुरीं वसते लभते मुदम्।।९।।

इति श्री पृथिवीपतिसूरिविरचितं श्रीपशुपत्यष्टकं सम्पूर्णम्।

श्री विश्वनाथाष्टकम्

गङ्गातरङ्गरमणीयजटाकलापं
गौरी निरन्तरविभूषितवामभागम्।
नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम्।।१।।

वाचामगोचरमनेकगुणस्वरूपं
वागीशविष्णुसुरसेवितपादपीठम्।
वामेन विग्रहवरेण कलत्रवन्तं
वाराणसीपुरपतिं भज विश्वनाथम्।।२।।

भूताधिपं भुजगभूषणभूषिताङ्ग
व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम्।
पाशाङ्कुशाभयवरप्रदशूलपाणि
वाराणसीपुरपतिं भज विश्वनाथम्।।३।।

शीतांशुशोभिकिरीटविराजमानं
भालेक्षणानलविशेषिपञ्चबाणम्।
नागाधिपारचितभासुरकर्णपुरं
वाराणसीपुरपतिं भज विश्वनाथम्।।४।।

पञ्चाननं दुरिमत्तमतङ्ङ्गजानां
नागान्तकं दनुजपुङ्ङ्गवपन्नगानाम्।
दावानलं मरणशोकजराटवीनां
वाराणसीपुरपतिं भज विश्वनाथम्।।५।।

तेजोमयं सगुणनिर्गुणमद्धितीय-
मानन्दकन्दमपराजितप्रमेयम्।
नागात्मकं सकलनिष्कलमात्मरूपं
वाराणसीपुरपतिं भज विश्वनाथम्।।६।।

रागादिदोषरहितं स्वजनानुरागं
वैराग्यशान्तिनिलयं गिरिजासहायम्।
माधुर्यधैर्यसुभगं गरलाऽभिरामं
वाराणसीपुरपतिं भज विश्वनाथम्।।७।।

आशां विहाय परिहृत्य परस्य निन्दां
पापे रतिं च सुनिवार्य मनः समाधौ।
आदाय हृत्कमलमध्यगतं परेशं।
वाराणसीपुरपतिं भज विश्वनाथम्।।८।।

वाराणसीपुरपतेः स्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मनुष्यः।
विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं
सम्प्राप्य देहविलये लभते च मोक्षम्।।९।।

विश्वनाथाष्टकमिदं यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते।।१०।।

इति श्री महर्षिव्यासप्रणीतं श्रीविश्वनाथष्टकं सम्पूर्णम्।

